No. १२३९ घ

Title न्यायपदार्थ दीपिका

Author कोण्ड भट्टः

Extent २६ पत्राणि Age

Subject न्याय शास्त्रम्

पदार्थदीपिका

१२३५

न्याय पदवाक्यप्रमान

सं १९५०

१ श्रीगणेशाय नमः॥ श्रीमत्सिद्धिकरं कांतं रमोमारमणात्मकम्॥ दयासिंधुं चिदानन्दं सितासितमुपास्महे॥१॥ इह खलु चतुर्थपुरुषार्थहेतुभूतमात्मतत्वज्ञान
मामनंति॥ तच्च पदार्थतत्वनिर्णयाधीनमिति पदार्थतत्वमत्र विविच्यते॥ तत्र प्रमितिविषयः पदार्थः। स द्विधा भावोऽभावश्च। भावाः षडेव। द्रव्यगुणकर्मसामान्यविशे
षसमवायभेदात्। तत्र द्रव्यत्वजातिमद्गुणाश्रयो वा द्रव्यं। तच्च पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदान्नवधा। तत्र पृथिवीत्वजातिमती गंधवती वा पृथिवी। मणि
मुक्तावज्रादावप्यनुद्भूतो गंधोस्त्येवेति न तत्राव्याप्तिः। तद्भस्मनि गंधोपलंभेन तत्रापि गंधकल्पनात्। अथवा। गंधवत्वं गंधसमानाधिकरणजलावृत्तिजातिमत्वं
करण ५ गंधसमानाधिद्रव्यत्वादिकमादाय जलादावतिव्याप्तिवारणाय जलावृत्तीति। एतेन नानागंधवदारब्धपदार्थस्य निर्गंधत्वपक्षेपि न तत्राव्याप्तिः। तादृशपृथि
वीत्वसत्वात्। सा च पृथिवी द्विधा। नित्याऽनित्या च। परमाणुरूपा नित्या। कार्यरूपा त्वनित्या। यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्ममुपलभ्यते तत्त्र्यणुकं। तस्य
षष्ठोंशः परमाणुः। तद्द्वित्रिभिर्द्व्यणुकैरारभ्यते। द्वाभ्यां परमाणुभ्यां च द्व्यणुकमिति स्वीकारात्। कार्यरूपा च त्रिधा। शरीरेंद्रियविषयभेदात्। शरीरं त्वंत्यावयवि भो
गायतनं। भोगनियामकमिति यावत्। तत्पंचधा। शुक्रशोणिताभ्यां विनैवादृष्टविशेषोपगृहीतपृथिवीजन्यं जरायुजमंडजं स्वेदजमुद्भिज्जं च। आद्यं वसिष्ठा
देः। गर्भवरकश्चर्मविशेषो जरायुः। तज्जं मानुषादि। अंडजं पक्ष्यादि। स्वेदजं लिक्षायूकादि। पृथिवीं भित्वा जायमानं वृक्षाद्युद्भिज्जं। इंद्रियं घ्राणं। तच्च
गंधतद्गतजातितदभावानामेव ग्राहकं। नासाग्रवृत्ति। तत्पार्थिवमेव। रूपादिषु पंचसु गंधस्यैवाभिव्यंजकत्वात्। कुंकुमगंधा[illegible]भिव्यंजकतैलवत्
सक्तुरसनवशरावगंधाभिव्यंजकजलेतिव्याप्तिवारणाय एवकारः। विषयाः पुष्पादयः। अप्त्वजातिमत्यः शीतस्पर्शवत्यो वाऽपः। ताश्चापि द्विविधाः। नि
त्याश्चानित्याश्च। परमाणुरूपा नित्याः। कार्यरूपाश्चानित्याः। ताश्चापि शरीरेन्द्रियविषयभेदात्त्रिधा। शरीरं वरुणलोके। तत्तु पार्थिवावयवमेलनात्कर
कावत् अदृष्टविशेषाद्वा घनीभूतं दृढं संद्रोगोपयोगि। इन्द्रियं रसनम्। तच्च रसतद्गतजातितदभावानामेव ग्राहकम्। जिह्वाग्रवृत्ति। तदाप्यमेव। रूपादि
षु पंचसु रसस्यैवाभि० लालावत्। जलमाधुर्यव्यंजकहरीतक्यामलकादौ व्यभिचारवारणाय एवकारः। तयोः कषायाम्लतया पटरंजकद्रव्यरूपविशेषा
भिव्यंजकत्वात्। विषया गंगाद्याः। तेजस्त्वजातिमदुष्णस्पर्शवद्वा परप्रकाशकरूपवद्वा तेजः। नित्यमनित्यं च। परमाणुरूपं नित्यं। कार्यरूपमनित्यम्।
तदपि त्रिधा। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं चक्षुः। रूपतज्जातितद्द्रव्यतद्गतजातिगुणकर्मणां ग्राहकम्। कृष्णताराग्रवृत्ति।
तत्तैजसमेव। रूपादिषु पंचसु रूपस्यैव। आलोकवत्। पूर्ववद्धरीतक्यामलकादौ व्यभिचारनिराकरणार्थं एवकारः। ननु रूपवान्परमाणुश्चाक्षुषा

कुतो न गृह्यते। चाक्षुषप्रत्यक्षे विषयद्रव्यगतं महत्त्वं हेतुः परमाणौ तन्नास्ती चेत्तर्ह्याकाशादयः कुतो न गृह्यंते। विषयगतं रूपं महत्त्वं चेति द्वयम।
था तप्तवारिस्थं तेज उष्मा वा कुतो न गृह्यते। उच्यते। द्रव्यचाक्षुषप्रत्यक्षे विषयगतमुद्भूतरूपं महत्त्वं च कारणम्। परमाणुर्न महान्। आकाशो न रूपवान्। तप्तवारि-
स्थं तेजश्च नोद्भूतरूपवत्। तद्रूपस्यानुद्भूतत्वात्। एवं चाक्षुषप्रत्यक्षे विषयगतउद्भूतस्पर्शोपि हेतुः। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे एवमहत्वरूपस्पर्शानां
लाघवाद्धेतुत्वात्। तथा च प्रदीपादिप्रभायां रूपमात्रं गृह्यते। तेन तदाश्रयद्रव्यमनुमीयत इति सिद्धांतः। प्रभाशब्दोपि तद्रूपवाचक एवेत्याहुः। नन्वेवमपि अं-
धकारस्थो घटोपि गृह्येत। द्रव्यचाक्षुषे आलोकसंयोगोपि हेतुरिति चेन्न। चक्षूरूपस्य सुवर्णरूपस्य वा अंधकारेपि संयोग सत्वादिति चेन्नाद्रव्य-
६ वदा प्रत्यक्षे उद्भूतानभिभूतरूपालोकसंयोगस्यापि हेतुत्वात्। चक्षूरूपस्योद्भूतरूपाभावात्। सुवर्णरूपस्याभिभूतत्वात् तत्संयोगेपि न प्रत्यक्षं। विषयश्चतुर्धा
भौमं दिव्यमौदर्यमाकरजं च। पार्थिवमात्रेंधनं तेजो भौमं। अग्न्यादि। अविंधनं तेजो दिव्यं। विद्युदादि। उभयेन्धनमौदर्यं। भक्षितान्नस्य पीतजलस्य च पचना-
र त्। खनिजमाकरजम्। सुवर्णादि। ननु सुवर्णं न तेजः परप्रकाशकरूपविरहात्। उष्णस्पर्शाभावाच्चेति चेन्न। अभिभूतरूपस्पर्शयोस्तत्र स्वीकारात्। पीतरूपवं-
तः पार्थिवभागास्तत्र मिलिताः संतीति तदीयरूपस्पर्शाभ्यां तयोरभिभवः संभवत्येव। सजातीयग्रहणाकृतमग्रहणं ह्यभिभवः। तारशब्दान्मन्दस्येव। ॥
मांसकास्तु। पीतरूपवद्द्रव्यांतरमेवमूचिरे। तन्न। द्रव्यांतरकल्पने गौरवात्। अन्ये तु हरिद्रादिवत्पीतरूपवत्त्वात्पृथिव्येव सुवर्णमित्याहुः। तन्न। अत्यंतानल-
संयोगाद्भस्मापत्तेः। वायुत्ववान्नीरूपस्पर्शवान्वा वायुः। सोपि द्विधा। नित्योऽनित्यश्च। परमाणुरूपो नित्यः। कार्यरूपोऽनित्यः। सोपि शरीरेंद्रियविषयप्राण-
भेदाच्चतुर्धा। शरीरं वायुलोके पिशाचादीनां च। इन्द्रियं त्वक् सकलशरीरव्यापकं। भिज्ञानाज्ञांतत्सत्वेपि तन्मनोयोगस्य स्वप्नजनकत्वात्तदा स्वप्नज्ञानमे-
वानत्वाचादि। पुरीतत्येव परं नास्ति। अतस्तस्यां मनःप्रवेशे ज्ञानशून्या सुषुप्तिर्भवति ज्ञानमात्रे त्वङ्मनोयोगस्य हेतुत्वेन तदानीं तदभावाज्ज्ञानाभावोपपत्तेः। न
नु वायवीयमेव। रूपादिशून्यं च स्थिति। अंगसंगसलिलशैत्याभिव्यंजकपवनवत्। ए[illegible]दौ जलस्पर्शव्यंजके व्यभिचारवारणाय एवकारः। तच्चोद्भूतस्पर्शतज्जातितद-
भावो उद्भूतरूपस्पर्शवद्द्रव्यतद्गतगुणतज्जातितदभावानां ग्राहकं। अत उद्भूतरूपाभावात्तप्तवारिस्थतेजोरूपाभावाद्वायुश्च त्वचा न गृह्येते। किंतु तत्स्पर्शमात्रं गृह्यते तेन तदा-
श्रयत्वेन वायुरनुमीयत इति सिद्धांतः। एवं प्रदीपवच्चंद्रादिप्रभापि न त्वचा गृह्यते। उद्भूतस्पर्शाभावात्। मीमांसकास्तु। उद्भूतस्पर्शवद्द्रव्यं त्वचो ग्राह्यं लाघवात्। न तु
रूपमपि तत्र प्रवेश्यं गौरवात्। अतो वायुरपि स्पार्शनप्रत्यक्ष एव। अत एव वायुं स्पृशामीत्यनुभवः। अन्यथा घटादेः स्पर्शो गृह्येते तेन द्रव्यमनुमीयत इति वक्तुं शक्यत्वात्। किं-

२ मपिद्रव्यंस्पार्शनप्रत्यक्षंनस्यात्।किंचचक्षुषारूपंगृह्यतेघटादितदाश्रयत्वेनानुमीयतइत्यपिस्यात्।तथाचद्रव्यमतीन्द्रियमेवस्यात्।एवंमहदुद्भूतरूपवद्द्रव्यं
चक्षुर्योग्यं।अतःप्रदीपचंद्रादिप्रभापिचक्षुर्ग्राह्येवेत्याहुः।विषयस्तुवृक्षादिकंपञ्जनकः।प्राणःपंचधा।प्राणापानव्यानोदानसमानभेदात्।शब्दाश्रयआ
काशः।सचतत्कार्यस्यशब्दस्यसर्वत्रोपलंभात्विभुः।लाघवादेकोनित्यश्च।श्रोत्रंतदीयमिन्द्रियम्।अदृष्टविशेषोपगृहीतकर्णशष्कुल्यवच्छिन्नंनभःश्रोत्रं।
बधिरस्यादृष्टविशेषाभावान्नश्रोत्रमस्ति।कालिकपरत्वानुमेयःकालः।सचैकोपिवर्त्तमानातीतभविष्यत्क्रियोपाधिवशाद्वर्त्तमानादिसंज्ञांलभते।पाकप
ठनादिक्रियावशात्पाचकपाठकादिव्यपदेशवत्।दिगेकानित्यादैशिकपरत्वापरत्वासाधारणंकारणम्।सचैंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशान
ब्रह्मानंतरूपोपाधिवशात्पूर्वादिभेदेनदशसंज्ञांलभते।एतौदिक्कालौजगद्धेतूजगदाधारौचाइहेदानींकरोमीत्यनुभवात्।आत्मत्वसामान्यवान्ज्ञा
नाश्रयोवाआत्मा।विभुर्नित्यश्च।सद्विधा।जीवेश्वरभेदात्।सुखाद्याश्रयोहंप्रत्ययवेद्योजीवः।नन्वहंगौरः।अहंजानामीतिसमानोपलंभाद्गौरादि
९ रूपवतिज्ञानसुखाश्रयतासिध्यतीतिदेहएवात्मास्यात्।नचशरीरंनात्माज्ञानशून्यत्वात्तदपिशरीरंज्ञानशून्यंपार्थिवत्वाद्घटवदित्यनुमानात्सिध्यतीतिवा
च्यम्।घटस्यकेवलपार्थिवत्वाज्ज्ञानशून्यत्वेपिभूतसमुदायात्मकत्वाच्छरीरस्यज्ञानवत्वसंभवात्।केवलचूर्णादौरागाभावेपिचूर्णपर्णादिसमुदायेत
बूलेरागोत्पत्तिवत्।अहंज्ञानवानितिप्रत्यक्षबाधेनानुमानस्यशरीरेज्ञानाभावासाधकत्वाच्च।वह्निरनुष्णः।कृतकत्वात्।घटवदित्यनुमानवत्।स्वीच
क्षुश्चदेहएवात्मेतिचार्वाकाः।एवंकाणोहंबधिरोहंइतिइंद्रियधर्मसामानाधिकरण्यादिंद्रियाण्येवात्मेत्यपरेवदंति।तत्कथंनित्योविभुरात्मेतिसंगच्छे
तइतिचेन्न।शरीरेन्द्रियाणामनित्यत्वेनात्मत्वासंभवात्।नचात्माप्यनित्यएवास्तु।कृतहानाकृताभ्यागमप्रसंगाद्धर्माधर्मशास्त्रवैयर्थ्यापत्तेः।किं
चाकस्मिदुत्पत्तिमारभ्यैवरूपभाग्यादिमान्नान्यइतिनियमायादृष्टविशेषोहेतुर्वाच्यः।सचेतज्जन्मनिनसंपादितइतितत्संपादकजन्मांतरयोगादात्म
सिद्धिः।अनेकजन्मयोगिनश्चनित्यत्वेवानाशकाभावात्।नचस्वतंत्रईश्वरएवस्वेच्छावशात्स्वसृष्टप्राणिष्वेवंकरोतिकुलालइवस्वनिर्मितघटेषुक्वचि
द्दुग्धयोगंक्वचिन्मूत्रपुरीषयोगमितिवाच्यं।अचेतनइवचेतनेतथाव्यवहारेवैषम्यनैर्घृण्यप्रसंगात्।दृश्यतेचकुलालादेरेवघटादिवस्तुत्रेषुनिर्मि
मितकतथाव्यवहारेवैषम्यादिप्रयुक्तानिंदेति।नचायंनित्यःपरमाणुरूपएवास्तु।सकलशरीरव्यापिसुखदुःखाननुभवप्रसंगात्।परमाणुरूपद्रा भ

नादेस्तद्धर्मस्यापत्यत्वापत्तेश्च। सच प्रतिशरीरं भिन्नः। सुखदुःखादियौगपद्याद्वैचित्र्याच्च। अन्यथा परकीयसुखदुःखानुसंधानप्रसंगाच्च। हस्तपादादिभेदस्ये
व शरीरभेदस्याप्रयोजकतयाऽननुसंधानेऽप्रयोजकत्वात्। जातिस्मराणां जन्मांतरीयार्थस्मरणानापत्तेश्चेति दिक्। दुःखासमानाधिकरणज्ञानवान्। नित्य
नाश्रयो वा ईश्वरः। स च सकलकार्यकर्तृत्वेन सिध्यतीति वक्ष्यते। आत्मन सुखादिप्रत्यक्षकरणं मनः। तच्च परमाणुपरिमाणं प्रतिपुरुषं भिन्नं। यत्रेंद्रि
ये संयुज्यते ततस्ततो ज्ञानमुत्पद्यते। अतो युगपदनेकेन्द्रियैर्ज्ञानाभावोपपत्तिः। अन्यथा युगपद्रूपशब्दादिग्रहणोपपत्तौ व्यासंगान्न ज्ञानमित्यनुभवानो
पपत्तेः। तथा च गौतमसूत्रम्। युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति। अत एव मनो विभु निःस्पर्शद्रव्यत्वात् आकाशवदिति मीमांसकोक्तमपास्तम्। अव
धानिनां तु अभ्यासविशेषात्त्वरणया झटिति मनसि क्रियया तत्तदिंद्रियैर्योगाज्ज्ञानक्रमिकत्वेपि यौगपद्याभिमानमात्रं। नन्वंधकारोपि निःस्पर्शत्वा
त्क्रियावत्त्वान्नीलत्वलक्षणरूपवत्त्वाच्च पृथिव्यादिभ्यो भिन्नं दशमं द्रव्यमस्त्विति कथं नवैव द्रव्याणीति चेन्नैवम्। तस्य रूपवद्द्रव्यत्वे च चक्षुषा ग्रहणं न स्यात्। द्रव्य
चाक्षुषमात्रे उद्भूतानभिभूतरूपवदालोकसंयोगस्य हेतुत्वात्। न च चक्षुर्गोलकवृत्तितामसेंद्रियांतरादंधकारग्रहः। इन्द्रियांतरकल्पने गौरवात्। किंचां
धकारसमनियत आलोकाभावोऽवश्यमभ्युपेयः। तथा च तेनैवारोपितनीलरूपेणांधकार इति व्यवहारसंभवान्न द्रव्यांतरं तमः। अतिगौरवात्। तस्मा
१॰ तेच दुद्भूतानभिभूतरूपवदालोकाभावसमूहस्तमः। गुणत्वजातिमंतो गुणाः। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वे गु
रुत्वद्रवत्वस्नेह[illegible]बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारशब्दाश्चतुर्विंशतिरेव। तत्र रूपत्वजातिमद्रूपम्। पृथिव्यादित्रयवृत्ति। शुक्लपीत
हरितरक्तकृष्णकपिलचित्रभेदात्सप्तधा। तदवांतरजातयस्त्वसंख्याताः। तत्र शुक्लं भास्वरं तेजसि। परप्रकाशकतावच्छेदकजातिविशेषो भास्वरत्वं। तदभा
स्वरं। शुक्लमेवाभास्वरं अपाकजमप्सु। षड्विधमचित्रं पाकजं पृथिवीपरमाणौ। सप्तविधमप्यपाकजमेव पृथिवीद्व्यणुकादौ। तत्रावयविरूपं प्रत्यवयवरू
पं कारणं। एवं रसादावपि। मीमांसकास्तु। एकैकैव नीलपीतारुणादिव्यक्तयो नित्याश्च। ताश्चोत्पद्यमानघटादौ घटत्वादिवत्संसृज्यंत इति रूपवान्
घट इत्यादिप्रतीतिः। घटादिनाशे च व्यक्त्यंतरे घटत्वादिवदेव वर्तत इत्याहुस्तन्न। एवं हि घटत्वादिवज्जातित्वापत्तेः। नित्यमेकमनेकसमवेतत्वं सामान्य
मिति तल्लक्षणयोगात्। इष्टापत्तौ नीलनीलतरादिव्यवहारानापत्तेः। न हि भवति गोतरगोतम इति। किंच नीलद्रव्यस्य पाकेन रक्ततादर्शनस्य

३ तेपूर्वनाशस्याकामेनाप्यभ्युपेयत्वान्नकिंचिदेतत्।रसत्वजातिमान्रसः।पृथिवीजलवृत्तिः।मधुराम्लकटुतिक्तकषायलवणभेदात्षोढा।मधुरोः
पाकजोऽप्सु।षड्विधोऽपिपाकजः पृथिवीपरमाणौ।द्व्यणुकादावपाकजः।गंधत्वजातिमान्गंधः।पृथिवीमात्रवृत्तिः।जलादौतुउपष्टंभकभागागतएवलोहि
तस्फटिकइतिवत्प्रतीयते।अतएवपुष्पाद्युपरिसमागतवायुनापुष्पाद्यवयवाएवानीयंतइतिसिद्धांतः।नन्वेवंपुष्पादेःसच्छिद्रताकर्पूरादेःपरिमाणन्यूनता
चस्यादितिचेन्न।भोजकादृष्टवशात्पुनर्भोगानांपूरणाभ्युपगमात्।क्वचित्कर्पूरादौतथात्वस्येष्टत्वात्।सुरभिरसुरभिश्चेतिद्विधोऽसोऽपिपाकजःपरमाणौ
द्व्यणुकादावपाकजः।स्पर्शत्वजातिमान्स्पर्शः।पृथिव्यादिचतुष्टयवृत्तिः।शीतोष्णानुष्णाशीतभेदात्त्रिधा।शीतोऽप्सु।उष्णस्तेजसि।अनुष्णाशीतःपृथिवी
वाय्वोः।वायावपाकजएव।पृथिवीपरमाणौपाकजः।पृथिवीद्व्यणुकादावपाकजः।कोमलकठिनचित्रभेदादनेकधा।ननुकथंरूपस्पर्शावेवचित्रावुदा
हृतौ।रसगंधयोरपिहरीतक्यादौचित्रयोर्दर्शनात्।नचतत्रनानारससमुदायएवभासते।षड्रसाहरीतकीतिव्यवहारादितिवाच्यम्।रूपस्पर्शयोर
प्येवमापत्तेः।चित्ररूपवतिअवश्याममत्वरक्तमित्याद्यनुभवाद्व्यवहाराच्चेतिचेदुच्यते।नतावन्नीलपीतारब्धेनीलंसंभवति।समवायेननीलप्रतिस्वाश्रय
समवेतत्वसंबंधेननीलेतरस्यप्रतिबंधकत्वात्।अन्यथापीतावच्छेदेनापिनीलापत्तेः।नापिपरस्परप्रतिबंधादुभयोरसंभवेननीरूपमेवास्त्वितिवाच्यम्।
अतीन्द्रियतापत्तेः।विषयगतोद्भूतरूपस्यप्रत्यक्षहेतुतायाःप्रागभिहितत्वात्।तस्मान्नीलपीतादिभिर्विलक्षणमेवचित्रंतत्रजन्यतइतियुज्यते।एवंस्पर्शेऽपि
वधेयम्।गंधरसयोस्त्वस्वीकारेऽपिनक्षतिः।तयोःप्रत्यक्षाहेतुत्वात्।केचित्तुचित्ररसगंधावपीच्छंति।तत्तुवर्धमानादिभिर्नादृतं।ननुरूपादयःपृथिवीपरमाणा
वेवपाकजाइतिकथंसंगच्छंतां।आपाकनिक्षिप्तघटादावपिपूर्वनाशापरोत्पत्त्योरनुभवसिद्धत्वादितिचेत्सत्यम्।घटमध्येऽपिपाकजरूपाद्यनुभवसिद्धम्।
तच्चतत्रअग्निसंयोगंज्ञापयति।अग्निसंयोगस्यैवपाकत्वात्।तथाचवह्न्यभिघातात्तत्रपरमाणुपर्यंतंघटावयवतदवयवानांविभागः।ततःपरस्परसंयो
क गनाशः।ततोविशकलितेषुतंतुषुपटनाशवदसमवायिकारणनाशाद्द्व्यणुकनाशेस्वतंत्राःपरमाणवःपच्यंते।ततश्चकदाचित्समानादग्निसंयोगादेकजातीयं
विलक्षणाच्चपरस्परविलक्षणंरूपमुत्पद्यते।पुनर्भोगादृष्टसहकृतईश्वरएवसृष्ट्यादाविवद्व्यणुकादिक्रमेणपूर्ववदेवतादृशरेखोपरेखासंस्थानवं
त्करोति।तथाचपरमाणुरूपात्द्व्यणुकेततस्त्र्यणुकइतिक्रमेणकुलालनिर्मितघटइवतत्रापिरूपाद्युत्पत्तिरितिभवति।परमाणावेवपाकजरूपंरसगंधस्पर्शा

नद्व्यणुकादाविति। घटादावेव पाकाभ्युपगमे कठिने घटादिमध्यभागे वह्न्यप्रवेशान्मध्ये पूर्वरूपादिनाशः नवीनोत्पत्ती न स्यातामिति काणादाः। नैयायि-
कास्तु। घटादयः सच्छिद्रा एव द्रव्याणि। कथमन्यथा भांडांतर्गतोदनादिपाकः कथं वा तन्मध्यवर्त्तिजलस्पंदनस्रवणे। तथा च तद्द्वारा प्रविष्टवह्निना मध्ये
पिपाकसंभवाद्दोरवयवस्तन्निष्ठमारणकपूर्वनाशनवीनोत्पत्तिकल्पनं तदुत्पादनायेश्वरे भारं च न सहते। तथा च तन्मते घटादावपि पाकजं सिद्धमिति न-
नु संयोगस्योभयनिष्ठत्वाद्घटादाविव वह्नावपि रूपरसादयः कुतो न भवंतीति चेत्सत्यम्। समवायेन पाकजरूपं प्रति पृथिवीत्वेन हेतुत्वात् वह्न्-
स्तेजस्त्वात्। ननु मतद्वयेप्यग्निसंयोगादेकस्माद्विलक्षणा भिन्नाश्च रूपादयः कथं प्रागभावभेदादिति चेन्न। तस्यैव लक्षण्याप्रयोजकत्वात्।
अन्यथा घटानामपि पटादिवत्परस्परवैलक्षण्यानापत्तिरिति चेन्न। रूपवति घटे रूपांतरानुत्पत्तेः रूपं प्रति रूपे प्रतिबंधकमिति सर्वसि-
द्धम्। एवं रसादावपि। तथा च प्रतिबंधकाभावरूपतत्तदभावकारणभेदवैलक्षण्याभ्यां भेदवैलक्षण्ये। द्वित्वत्रित्वादिजद्व्यणुकत्र्यणुकाणुत्वह्रस्वत्वदीर्घत्वमह-
त्त्वेष्वप्येवमेव भेदादि। केचित्त्वग्निसंयोगभेदादेव भेदमाहुः। तेषामणुत्वादौ गतिश्चिंत्या। इदमेव पृथिवीत्वजातौ प्रमाणम्। ननु स्पर्शस्य पाकजत्वे किं मानं न हि रू-
परसादिवत्पाकोत्तरस्पर्शांतरमनुभूयते। न च चांडालस्पर्शनिषेधगोब्राह्मणस्पर्शविहितविध्यनुपपत्त्या तत्सिद्धिरित्याचार्यैरुक्तं युक्तम्। तत्र स्पर्शपदस्य संयोग-
परत्वात्। अन्यथा गंगास्पर्शविधिकर्मनाशाजलस्पर्शनिषेधानुरोधाज्जलेपि दीपाग्निस्पर्शनिषेधपरमेश्वरार्त्तिक्यदीपस्पर्शविधेरनुरोधात्तेजसि तत्सिद्ध्यापत्ते-
रिति चेन्न। पूर्वं कठिनस्य पाकेन कोमलतायाः पूर्वं कोमलस्य पाकेन काठिन्यस्य चानुभवसिद्धत्वेन रूपादिवत्पाकजत्वसिद्धेः। न च काठिन्यकोमलत्वे संयोगविशेषौ
चाक्षुषत्वापत्तेः। एते रूपरसगंधस्पर्शा उद्भूतानुद्भूतभेदाद्द्विधा। उद्भूतत्वं जातिस्तदभावोनुद्भूतत्वं इति प्राचः। अनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वमिति मणिकाराः। ७
संख्यात्वजातिमती संख्या। एकत्वद्वित्वबहुत्वभेदात्त्रिधा। सकलद्रव्यवृत्तिः। तत्रावयवगतैकत्वेनावयविन्येकत्वं जन्यते। द्वित्वादौ तु विशेषः। घटद्वये चक्षुरादि-
संयोगे सति तत्रायमेकोयमेक इति। अपेक्षाबुद्ध्या द्वित्वोत्पत्तिरनंतरं द्वित्वद्वित्वत्वनिर्विकल्पकं ततः सविकल्पकमनंतरमिमौ द्वाविति प्रतीतिर्भवति। तत्र घटद्वयं ह
५२ त्येकत्वद्वयं समवायिकारणं। अपेक्षाबुद्धिर्निमित्तकारणम्। द्वौ घटौ समवायिकारणे। एवं बहुत्वेपि। अपेक्षाबुद्धिनाशाद्द्वित्वादिनाशः। अत एवापेक्षाबुद्धिः
क्षणत्रयस्थायिनी। अन्यथा द्वित्वविशिष्टप्रत्यक्षायोगात्। तद्भिन्नज्ञानेच्छाप्रयत्नादयस्तु द्विक्षणस्थायिन एवेति सिद्धांतः। परमाणुद्व्यणुकादिगतद्वित्वत्रित्वादेर्भ-
गवदपेक्षाबुद्ध्योत्पन्नस्य च निमित्तकारणादृष्टनाशान्नाशः। अयमेकोयमेक इत्यादिरूपादिविषयापेक्षाबुद्ध्योर्द्वित्वं त्रिषु त्रित्वमित्यादिनियमः कुत्रास्तदेपरी

ऽद्या।

५ ग

त्यस्य दुर्वारत्वात् समवायिकारणादिसाम्ये कार्यवैलक्षण्यं वा कथं । न चैकत्वद्वयं द्वित्वे त्रयं त्रित्वे हेतुरिति वाच्यम् एकत्वे द्वित्वाद्यभावाद् द्वित्वोत्पत्तेः प्राग्द्वयेपि तदभावा
त् द्वित्वे द्व्यद्वयं हेतुरित्यस्याप्यसंभवात् । न च प्रागभावादेतदुपपत्तिरिति आचार्योक्तं युक्तम् । तस्य वैलक्षण्याप्रयोजकत्वात् । अन्यथा कार्यवैलक्षण्यात्कारणवैजात्य
कल्पनोच्छेदापत्तिरिति चेत् । उच्यते । केवलापेक्षाबुद्ध्या द्वित्वे द्वित्वसहिता या त्रित्वे तत्सहिता या चतुष्ट्वमित्यभ्युपगमात् । द्वित्वे द्वयोरेव कुत इति चेत् । तत्रैव
तत्प्रागभावसत्त्वादिति गृहाण । परिमाणत्ववत् परिमाणम् । सकलद्रव्यवृत्ति । तच्चतुर्विधं । अणुमहद्दीर्घह्रस्वभेदात् । तत्रोत्कृष्टाणुत्वह्रस्वत्वे परमाणुम
नसोर्नित्ये । अपकृष्टे द्व्यणुके एवं महत्त्वदीर्घत्वे उत्कृष्टे नित्ये आकाशादौ विभुत्वशब्दवाच्ये । अपकृष्टे जन्ये तरतमभावेन त्र्यणुकादौ स्तः । बिल्वादामलकम
णुवित्ति व्यवहारस्तु अपकृष्टमहत्त्वाद्गौणः । एवं प्रांशोर्वामनो ह्रस्व इत्यपि अपकृष्टदीर्घत्वाद्गौणः । तत्र द्व्यणुकपरिमाणे परमाणुद्वित्वसंख्या योनिः । द्व्यणुक
गतबहुत्वात् त्र्यणुके महत्त्वं । घटादौ च कपालमहत्त्वं क्वचित् क्वचिद्बहुत्वसंख्या विलक्षणमहत्त्वे हेतुः । तूलपिंडपरिमाणविशेषे अवयवप्रचयः कारणं । स च
प्रशिथिलः संयोगः । घटः पटात्पृथगिति अनुभवसिद्धपृथक्त्वजातिमत्पृथक्त्वम् । तदपि संख्यावदेव सर्वद्रव्यवृत्ति । एकपृथक्त्वद्विपृथक्त्वादिभेदेना
नेकधा । अवयवगतैकपृथक्त्वादवयविन्येकपृथक्त्वमुत्पद्यते । रूपं रसात्पृथगिति तु भिन्नत्वात् गौणः प्रयोगः । ननु भेदेनैव घटः पटात्पृथगिति व्य
वहारोपपत्तौ पृथक्त्वाख्यगुणे किं मानमिति चेत् । अत्राचार्याः । अन्यारादितरर्ते इति व्याकरणसूत्रेण पृथक्त्ववाचकपदयोगे विधीयमानपंचम्यनुरो
धेन तत्स्वीकारात् । महाभाष्ये अन्य इत्यर्थग्रहणमभ्युपेत्य तदर्थवाचकेतरादिपदयोगेपि पंचमीसिद्धेस्तस्य सूत्रे प्रत्याख्याततत्वात् भेदस्यान्यपदार्थ
त्वेन विवक्षणे च तद्वाचकपदयोगाद्विशेषाद्घटादन्यो विलक्षण इत्यादाविव घटो नेत्यत्रापि पंचम्यापत्तेः । संयुक्तावित्यनुभवसिद्धसंयोगत्वजातिमा
न्संयोगः । सर्वद्रव्यवृत्तिः । स त्रिविधः । अन्यतरकर्मजः उभयकर्मजः संयोगजश्च । निष्क्रियस्य स्थाणोः क्रियावता पक्षिणा सह आद्यः । मल्लयोर्मेषयोर्वा द्वि
तीयः । अंगुलितरुसंयोगात्कायतरुसंयोगोन्त्यः । सोयं संयोगो द्विनिष्ठः । घटपटौ संयुक्ताविति प्रत्ययात् । घटे पटस्य पटे घटस्यान्य एव संयोगः ॥
अन्यथा घटः परसंयुक्त इतिवत् घटो घटसंयुक्त इत्यपि प्रतीत्यापत्तेः । तथा चैकवृत्तिरेव संयोग इति मीमांसकाः । घटपटौ विभक्ताविति प्रतीतिसिद्धवि
भागत्वजातिमान् विभागः । सकलद्रव्यवृत्तिः संयोगजः । हिमवद्विंध्यौ विभक्ताविति प्रयोगस्तु संयोगाभावयोगाद्गौणः । शेषं पूर्ववत् । परत्वत्वजातिम
त्परत्वम् । तत् द्विविधम् । कालिकं दैशिकं च । आद्यं जन्यद्रव्ये एव द्वितीयं मूर्त एव । इयत्तावच्छिन्नमूर्तत्वमुच्यते । तदाश्रयो मूर्तं । तथाहि । युवस्थविर
पिंडयोरयमस्माद्बहुतरतपनपरिस्पंदाश्रयः । अयमस्मादल्पतपनपरिस्पंदाश्रय इति बुद्ध्या परत्वापरत्वे जन्येते । तद्द्येव अयमस्मात्परइति

२१ तचार्थं द्विधा साधारणधर्मदर्शनजोऽसाधारणधर्मजो विप्रतिपत्तिजश्च स्थाणुपुरुषसाधारणोच्चत्वदर्शनजस्त्वाद्यः नित्यानित्यभिन्नो व्यावृत्तो गंधवाद्दिदर्शनजस्तः शब्दो नित्यो ऽनित्यो वेति

अयमस्मादपर इति धीकृत्पद्यते एतदेव ज्येष्ठत्वं कनिष्ठत्वं च। तत्र तपनक्रियायाः पुरुषे संबंधे घटको महाकालोऽभ्युपेयते। एवं यवहितसन्निकृष्टयोः

पिंडयोरयमस्मात्स्वल्पतरसंयुक्तसंयोगवान् अयमस्माद्बहुतरसंयुक्तसंयोगवानिति ज्ञानाद्दैशिके परत्वापरत्वे जन्येते। तयोरेवायमपरोऽयं

पर इति धीरुत्पद्यते। तत्र तावद्देशसंयोगसंक्रामिका महादिगभ्युपेयते। गुरुत्वं त्वजातिमद्गुरुत्वम्। प्रथमपतनासाधारणकारणम्। पृथि

वीजलवृत्ति। अतींद्रियं पतनानुमेयमित्युदयनाचार्याः। अधोदेशावच्छेदेन प्रत्यक्षमेवेति लीलावतीकारः। द्रवत्वं त्वजातिमद्द्रवत्वम्। पृथिव्यादित्रय

वृत्ति। द्विविधं सांसिद्धिकं नैमित्तिकं च। तत्र स्वाभाविकं जले। करकादौ त्वदृष्टविशेषात् घनीभावात्प्रतिबंधकमात्रम्। वस्तुतो स्त्येव। द्रवोत्तरमुपलंभा

त्। लाक्षासुवर्णादावग्निसंयोगनिमित्ताज्जायमानमन्यं। स्नेहः संग्रहरूपकार्यानुमेयो गुणः। जलमात्रवृत्तिः। घृततैलादावुपष्टंभकजलभागगतः। बु

द्धित्वजातिमती बुद्धिः। सा द्विधा। स्मृतिरनुभवश्च। स्मरामीत्यनुभवसिद्धिजातिमती स्मृतिः। सा च पूर्वानुभवजन्यसंस्कारजेति वक्ष्यते। अनुभवामीत्यनु

भवसिद्धजातिविशेषो ऽनुभवत्वम्। इत्येके। अनुमित्यादावनुभवामीत्यप्रतीतेः प्रत्यक्ष एव तथानुभवात् अनुभवसिद्धं अनुभवत्वं प्रत्यक्षमेवा प्रकृते तु स्मृ

तिभिन्नज्ञानत्वमेवानुभवत्वं इत्यपरे। सेयं बुद्धिर्द्विधा। मिथ्या प्रमा च। असद्विषयिणी मिथ्या। शुक्ताविदं रजतमिति बुद्धौ शुक्ति रजतत्वयोः प्रसिद्धयोरलीक

स्यैव समवायस्य विषयीकरणा दिति वाचस्पतिमिश्राः। आचार्यादयस्तु। असतो भानासंभवाच्छुक्तौ प्रसिद्धरजतत्वस्यैव तत्समवायस्यारोपणेन

मतौ मिथ्यात्वं। घटे रूपमित्यस्य वारणाय विशेष्यावृत्तीति नोक्तं। असंबद्धत्वं तु तत्र नास्तीति नातिव्याप्तिः। सा त्रिधा। संशयविपर्ययतर्कभेदात्। एकस्मिन्ध

र्मिणि विरोधविषयकनानार्थावमर्शः संशयः। यथा स्थाणोः स्थाणुर्वा पुरुषो वायमिति। अत्र पुरुषत्वे तत्संबंधश्च तत्र नास्तीति भवत्यसद्विषयत्वं।

तियोगिव्यधिकरणतदभाववति तत्प्रकारको निर्णयो विपर्ययः। यथा शुक्ताविदं रजतमिति। रजतत्वाभाववत्यां शुक्तौ तन्निर्णयो ऽयं भवत्येव। व्याप्यारोप

२पका प्रयुक्तो व्यापकारोपस्तर्कः। यथा यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादि। वह्न्यभावो व्याप्यस्तदारोपप्रयुक्तो व्यापकधूमाभावारोपो ऽत्रास्ति। स्वप्नस्तु संशयविपर्यया

त्मकः स्मरणमेवा दोषवशात्तदिति स्थाने इदमिति ग्रहणमिति नैयायिकाः। वैशेषिकास्तु। तर्कस्याहार्यविपर्ययत्वात्तत्पृथग्गणनं। एतेन संशयविपर्ययस्व

प्नकं नभासत इत्यादि वा कश्चिदपि स चेतसा मूक तै वो चिते त्याहुः। तन्मते विशेष्यासंबद्धविशेषणविषयकत्वं ~~× × ×~~

ज्ञानध्यवसायभेदेनाविद्या चतुर्धेत्याहुः। मिथ्यात्मकः संयोगजं ज्ञानं स्वप्नः। अविदितवस्तु पदार्थदर्शनात्किमेतदिति धीरनध्यवसायः। न चायं संशयः नानाकोट्य

भावात् ४

५ तुल्लेखात्।प्रमाचयथार्थानुभवः।अबाधितार्थविषयंज्ञानंयथार्थं।स्वविषयसंबंधेनविशेषणवद्विशेष्यविषयकत्वमित्यर्थः।तथाचैकः पक्षइतिपरंप
5 रयाप्रमांसाचप्रमाप्रत्यक्षात्मिकैवेतिचार्वाकाः।अनुमितिरपीतिकणादसुगतानुपमितिरपीतिन्यायैकदेशिनः।शाब्दीपीतिनैयायिकाः॥अ
र्थापत्तिरपीतिप्राभाकराः।अनुपलब्धिरपीतिभाट्टाः।संभवैतिह्यरूपापीतिपौराणिकाः।एतादृशप्रमाकरणंचप्रमाणं।करणत्वंचासाधारण
कारणत्वं।असाधारणत्वंचव्यापारवत्त्वं।तथाचचक्षुरादिकमेवप्रत्यक्षादिकरणंइत्येके।आचार्यास्तु।अव्यवधानेनकार्योत्पादकत्वमसा
धारणत्वंतथाचचक्षुःसंयोगादिकंप्रत्यक्षेकरणं।लिंगपरामर्शरूपंतृतीयंज्ञानमेवानुमिताविल्याहुः।कारणत्वंचानन्यथासिद्धनियत
लोध पूर्ववृत्तित्वं।यथाघटेदंडः दंडःदेवादागतरासभस्यतंतुरूपस्यचवारणायक्रमेणपदत्रयमितिप्राचः।वस्तुतस्तु।नियतपदंनदेयमेवरूपवद्रास
भस्यान्यथासिद्धत्वेनैववारणात्।अन्यथासिद्धत्वंचावश्यकल्प्यमानपूर्ववर्तिनएवकार्यसंभवेतत्सहचरितत्वं रासभसत्त्वेपिदंडचक्रादेरा
चण वश्यकत्वान्नैरयमन्यथासिद्धएवेतितत्त्वं।तथाप्रमाकरणंचार्वाकमतेएकं निर्विकल्पकंचवैशेषिकाणांद्वयमित्यादिसिद्धमितितथाहि।सा
क्षात्करोमीतिप्रतीतिसाक्षिकजातिविशेषवत्ज्ञानंप्रत्यक्षं।तद्द्विधा।नित्यमनित्यंच।नित्यंभगवतःतत्सर्वविषयंप्रमाच।अनित्यंजीवानां
तद्द्विधा।सविकल्पकं।निर्विकल्पकंच।अयंघटोयंदंडीत्यादिशब्दाभिलापयोग्यंविशेषणविशेष्यवैशिष्ट्यावगाहि वासविकल्पकं।त
लेक त्कारणंनकल्प्यमतीन्द्रियंविशिष्टशब्दाभिलापयोग्यंवैशिष्ट्यानवगाह्येतयमात्यथा।दंडीपुरुषइतिज्ञानेदंडोविशेषणंपुरुषोविशेष्यःसं
योगःसंबंधइतितदवगाहितज्ज्ञानंसविकल्पकं।तद्दंडज्ञानमंतरेणनोत्पद्यतइतिदंडज्ञानजन्यं।पर्यासुप्तोत्थितस्यजायमानेघटइतिज्ञाने
घटत्वंविशेषणंघटोविशेष्यःसमवायःसंबंधइतितदवगाहितत्सविकल्पकंघटत्वज्ञानजन्यंवाच्यं।तत्कारणीभूतंज्ञानंचानुभवानासंपन्ना
दतीन्द्रियंनिर्विकल्पकमभिधीयतइति।नास्तिकास्तु।निर्विकल्पकमेवप्रमा।स्वलक्षणवस्तुविषयत्वात्।तत्रसूर्यादिवत्स्वप्रकाशंननुप
टादिवत्परप्रकाश्यं।सविकल्पकंतुनप्रमा।अलीकघटत्वाद्यवगाहित्वात्।वंध्यापुत्रइतिज्ञानवदित्याहुः।तत्रेतिवक्ष्यते।तत्रप्रत्यक्षंप
श्यामिजिघ्रामिआस्वादेस्पृशामिशृणोमिमनसासुखंसाक्षात्करोमीतिप्रतीतिसाक्षिकचाक्षुषत्वादिजातिषड्भेदात्षोढा।तत्करणंच

क्षुरादिः तैर्विषयैर्गृह्यमाणो विषयेण सह सन्निकर्षोऽवांतरव्यापारः। ते च संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवेतस
मवायविशेषणताज्ञानलक्षणासामान्यलक्षणायोगजधर्मलक्षणा चेति नव। षडाद्या लौकिकाः। अन्ये त्रयौ लौकिकाः। तत्र मनसा आत्मा य
मानेऽहमित्यात्मप्रत्यक्षे मनःकरणम्। आत्मप्रत्यक्षं फलं। आत्ममनःसंयोगोऽवांतरव्यापारः। संबंध इति यावत्। अन्ये तु तज्जन्यतज्जन्य
जनकोऽवांतरव्यापारः। भवति चात्ममनःसंयोगो मनोजन्यस्तज्जन्यज्ञानजनकश्चेति व्यापारः। न चाजन्ये शब्दसमवायेऽव्याप्तिः। तस्य
ख५ व्यापारत्वास्वीकारात्। शब्दस्यैव प्रत्यक्षे व्यापारत्वात्। यद्वा श्रोत्रमनःसंयोग एव शब्दस्य तदत्यंताभावादेश्च प्रत्यक्षे व्यापारः। तस्य
श्रोत्रजन्यत्वात्प्रत्यक्षजनकत्वाच्चेति वदंति। सुखादिग्रहे संयुक्तसमवायः मनःसंयुक्ते आत्मनि सुखस्य समवायात्। सुखसमवेतसुख
त्वादिग्रहे संयुक्तसमवेतसमवायः। एवं घटादिग्रहे चक्षुषः स्पर्शनस्य वा संयोगः। रूपादौ संयुक्तसमवायः। रूपत्वादौ संयुक्तसमवेतसम
वायो द्रष्टव्यः। द्रव्यप्रत्यक्षमात्रे इंद्रियसंयोगस्य शब्देतरद्रव्यसमवेतग्रहे संयुक्तसमवायस्य तत्समवेतग्रहे तृतीयस्य हेतुत्वस्य सामान्यतः
स्वीकारात्। ननु चक्षुषो गोलकविशेषरूपस्य घटादिसंयोगः प्रत्यक्षबाधितः कथमासत्तिरिति चेन्न। तत्र गोलकाधिष्ठितानामिंद्रियाणामती
न्द्रियाणामभ्युपगमात्। गोलकादिरूपत्वे वाऽसंबद्धे ग्राहकत्वमभ्युपेयं। तथा च पृष्ठभागीयाः पुरोवर्त्तिनो भित्त्यादिव्यवहिताश्च पदार्था गृह्येरन्।
व्यवधाने प्रतिबंधकमिति चेन्न। भित्त्यादिपरभागस्थितानां परावृत्त्यदर्शने पृष्ठदेशस्थस्य च प्रत्यक्षं न स्यात्। नत्वुसर्पीयतत्कालीनप्रत्यक्षं प्रत्ये
व प्रतिबंधकत्वकल्पने चातिगौरवं। तस्मादावश्यकमतींद्रियमिंद्रियम्। नन्वेवं शाखाचंद्रमसोस्तुल्यकालग्रहणं न स्यात्। किं च नेत्रोन्मील
२ नेग्रहराद्यवधि सूर्यचंद्रग्रहणार्थं विलंबापत्तिः। चक्षुसाव दूरंगमनकल्पनादिति चेन्न। अतिलाघवादतिशीघ्रं तावद्दूरगमनाद्दृशोग्रय
हस्याप्युत्पादप्रतीतेश्चोपपत्तेः। तदुक्तं। अचिंत्यो हि तेजसो लाघवातिशयेन वेगातिशयः। यत्प्राचीनाचलचूडावलंबिन्येव भगवति मृगल
मालिनि भवनोदरे घालोक इत्यभिमानो लोकानामिति दिक्। समवायेन शब्दग्रहः। श्रोत्रसमवायस्य शब्दे सत्त्वात्। शब्दत्वकत्वादिग्रहे सम
वेतसमवायः। विशेषणतया भावग्रहः। शब्दो नास्तीति श्रोत्रे शब्दाभावस्य विशेषणतास्त्येव। भूतले रूपादौ घटाभावग्रहे चक्षुःसंयुक्तविशे

६ षणतासंयुक्तसमवेतविशेषणतेत्यादि दुष्टव्यं। कवेः काव्यरचनामूलभूते विशिष्टज्ञाने मनसा जायमाने विशकलितपदार्थस्मरणरूपं
नैसन्निकर्षः। अन्यथा तत्र सन्निकर्षाभावेनातीन्द्रियातीतानागतपदार्थवैशिष्ट्यज्ञानासंभवात्। घटत्वसामान्यलक्षणप्रत्यासत्त्यानता
गतव्यवहितसकलज्ञानोत्पत्तौ सामान्यं प्रत्यासत्तिः। अन्यथा एतादृशो घटपदवाच्य इत्येकत्र बोधिते सर्वत्र घटे तद्ग्रहो न स्यात्। ज्ञानमा
त्रं अपेक्षितस्तस्थौ सुप्तमीन इव ह्रद इत्याद्यभियुक्तोक्तया योगिभिः सर्वसाक्षात्कारात् तत्रोत्पत्त्या। योगाभ्यासेन जातो दृष्टविशेषो योगजधर्म इत्यु
च्यते॥ ॥अथानुमानं निरूप्यते॥ अनुमिनोमीत्यनुभवसिद्धजातिविशेषवत्यनुमितिः॥ तत्करणमनुमानम्। तच्च ज्ञायमानं लिङ्गमि
ति प्राञ्चः। तथाहि। यद्धर्मावच्छिन्नसमानाधिकरणा यावन्तो यत्साध्यतावच्छेदकविशिष्टसमानाधिकरणास्तत्साध्यसामानाधिकरण्यविशिष्टधर्मवत्त्वं व्या
प्तिः। तदाश्रयो धूमादिर्लिङ्गम्। तस्मिंल्लिङ्गे यत्र धूमस्तत्र सर्वत्र वह्निरिति भूयो दर्शनात् धूमत्वावच्छिन्नधूमसमानाधिकरणाः सर्वे महानसत्वादयो व
ह्नित्वावच्छिन्नवह्निसमानाधिकरणास्तादृशवह्निसामानाधिकरण्यविशिष्टधूमत्ववान् धूम इति व्याप्तिज्ञानं प्रथमं जा
यते। ततोऽपूर्वपर्वतादौ धूमदर्शनान्द्वितीयं ज्ञानं जायते। ततो वह्निव्याप्यधूमवानयमिति तृतीयं ज्ञानमुत्पद्य
ते। तदेव लिङ्गपरामर्शः। तत्र लिङ्गपरामर्शत्वेन परामृश्यमाने लिङ्गत्वेन वा कारणतेत्यत्र विनिगमकाभावादुभयमपि द्वि
रद्वारिभावेन हेतुः। लिङ्गकरणपरामर्शो द्वारं व्याप्तिज्ञानमनुपरामर्शे विशेषणज्ञानत्वेनोपयुज्यते। ततो यमपर्वतो व
ह्निमानिति साध्यवह्निविशिष्टज्ञानरूपानुमितिर्भवतीति मणिकाराः। तन्न। अतीतानागतलिङ्गेनापि अनुमितिदर्शना
ल्लिङ्गस्य करणत्वं। किन्तु व्याप्तिज्ञानं करणं परामर्शो व्यापार इत्याहुः। स्मरणात्मकपरामर्शोदसन्निकर्षहेतुकेऽप्यनुमि
तौ तत्र व्याप्तिज्ञानस्य पूर्वपरामर्शजन्यसंस्कारैर्व्यवधानाच्चाकरणत्वं सम्भवतीति संस्कारसाधारणपरामर्शजन
कत्वेनैवानुमितिकरणत्वमिति नव्याः। जनकत्वं हि कारणत्वं तच्चान्यथासिद्धनियतपूर्ववर्तित्वं तच्च प्रागभावावच्छिन्नस

पूर्ववृत्तित्वं।१

मयवृत्तित्वं। अतिगौरवग्रस्तमितिनैतेनरूपेणकारणता। किंतुमनएवानुमितिकरणं। परामर्शोव्यापारः। उक्तंचत्रमेयभाष्येस्मृत्यनुमित्यादिकरण
त्वेनमनःसाधितमितिनव्याः। ज्ञानत्वेनैवानुमितिकरणता। परामर्शोविशेषकारणमितिनातिप्रसंगइत्यपिकेचित्। ननुव्याप्तिग्रहेसतिमहानस
एवानुमीयतांवह्निव्याप्यधूमवानयमितिपरामर्शस्यतत्रापिसंभवादितिवाच्यंपक्षतायाअप्यनुमितिहेतुत्वात्। अनुमितीच्छाभावविशिष्ट
साध्यनिर्णयाभावोहिपक्षता। महानसादौचानुमितीच्छाविरहसहितएवसाध्यनिर्णयोस्तीतिनपक्षता। तत्रैवानुमितिर्भवत्वितिइच्छायां
पक्षतासंपत्तये अनुमितीच्छाभावविशिष्टेतिविशेषणं। तथाचपुरुषेसत्यपिदंडेभावाद्दंडिपुरुषाभाववत्साध्यनिर्णयेसत्यपिइच्छाविरह
पविशेषणाभावात्तादृशनिर्णयाभावरूपापक्षताभवति। साध्यसंदेहःपक्षतातदुक्तंभाष्येनानुपलब्धेननिर्णीतेर्थेन्यायःप्रवर्तते अ
पितुसंदिग्धेर्थेइतिमतेचतत्रानुमितिर्नस्यादितितन्नयुक्तं। किंतुधूमोवह्निव्याप्योधूमवान्पर्वतइतिज्ञानद्वयमेवहेतुरस्तु। कुतः
परामर्शोपीतिमीमांसकंकंडलिकारयोर्मतं। धूमोवह्निव्याप्यः। आलोकवान्पर्वतइतिज्ञानादप्यनुमानापत्तेः धूमेव्याप्तेरालोके
पक्षधर्मतायाश्चज्ञानसत्वात्। नचैकत्रहेतौतदुभयावगाहिज्ञानंकरणमितिवाच्यं। धूमोवह्निव्याप्यःद्रव्यवान्पर्वतइतिज्ञानाद
प्यनुमित्यापत्तेः द्रव्यत्वेनधूमस्यैवपक्षेवृत्तित्वभावात्। नचैकेनधूमत्वेनरूपेणव्याप्तिपक्षधर्मताज्ञानेहेतूवह्निव्याप्यवान्पर्व
तइतिआसवाक्यजपरामर्शादनुमित्यनापत्तेः। तस्मात्परामर्शएवावश्यकः। सोयंपरामर्शोव्याप्तिज्ञानक्रमेणस्वस्यैवयत्रोत्प
न्नंअनुमितिरपिस्वस्यैवतत्स्वार्थानुमानं। यत्रतुस्वयंबुध्वाशब्देनपरंबोधयतितत्परार्थानुमानं। तत्रप्रतिज्ञाहेतूदाहरणोपन
यनिगमनाख्याःपंचावयवाः। तत्रपर्वतोवह्निमानितिसाध्यविशिष्टपक्षबोधकंवचनंप्रतिज्ञाकुतइत्याकांक्षाशमकंधूमादिति
पंचम्यंतंलिंगवचनंहेतुः। धूमोस्तुवह्निमीस्तुइत्याशंकाशमकंयत्रधूमस्तत्रवह्निर्यथामहानसइत्यसौसव्याप्तिकंदृष्टांतव
चनमुदाहरणं। हेतूदाहरणाभ्यांपर्यवसितव्याप्तिविशिष्टपरामर्शजनकंतथाचायंवह्निव्याप्यधूमवानयमितिवोपन
यःपक्षेसाध्योपसंहाररूपंतस्मात्तथेतिवाक्यंनिगमनं। एतएवप्रतिज्ञापदेशनिदर्शनानुसंधानप्रत्याम्नायशब्देनवैशेषिके
रूच्यंते। अपदेशोहेतुः। शेषंक्रमेणज्ञेयं। मीमांसकास्तु [illegible] रणां तास्तदाद्यास्त्रयः। नचपरार्थानुमाने

धा १

शाब्दबोधात्मकस्वसाध्यनिर्णयो नानुमितिरिति वाच्यं। वादिवाक्यस्याप्रामाण्यशंकास्कंदितत्वेन निर्णयाजनकत्वात्। पंचावयववाक्यघटनंतरमनसा
बाधकाभावप्रतिसंधाने सति वादिकारितव्याप्तिज्ञानादिवशान्मानसपरामर्शात्तिरमनुमित्सास्त्युपगमादिति दिक्। तदिदं लिंगं त्रेधा। केवलान्वयि
केवलव्यतिरेकि अन्वयव्यतिरेकिभेदात्। तत्र वृत्तिम[illegible]दत्यंताभावाप्रतियोगी साध्यसाधको हेतुः केवलान्वयी। यथेदं वाच्यं ज्ञेयत्वा
द्व्यत्वादित्यादि। अन्वयगतसाध्यसाधनसहचारो हेतुः केवलव्यतिरेकी। यथा आकाशः पृथिव्यादिसर्वेभ्यो भिद्यते शब्दवत्वादिति। अत्र शब्दस पृथि
व्यादिभेदसाहचर्यं न क्वापि दृष्टं किंतु यत्रेतरभेदो नास्ति तत्र शब्दो नास्तीति इतरभेदाभावशब्दाभावयोरेव सामानाधिकरण्यमवगतं। अतो व्यतिरेक
७ योः साध्याभावहेत्वभावयोरेव व्याप्तिग्रहात् केवलव्यतिरेकिता। न च शब्दे हेतौ व्याप्त्यग्रहादितरभेदव्याप्यशब्दवानयमिति परामर्शासंभवेन क
रिति थमत्रानुमितिरिति वाच्यं। ययोरभावयोर्व्याप्तिर्विनाप्याधकृतयोरपीतितर्कसहकृतमनसा हेतावपि साध्यव्याप्तिग्रहणे परामर्शसंभवात्
यद्वा साध्याभावव्यापकाभावप्रतियोगिहेतुमानयमित्येव व्यतिरेकिलिंगपरामर्शः। ततोनुमितिः। यत्र साध्यहेत्वोः तदभावयोश्च व्या
प्तिर्गृह्यते सोन्वयव्यतिरेकी। यथा यत्र धूमस्तत्र वह्निः यत्र वह्न्यभावस्तत्र धूमाभाव इति उभयत्र सहचारग्रहाद् धूमसहचरिताः सर्वे
वह्निसहचरिता वह्न्यभावसहचरिताः सर्वे धूमाभावसहचरिता इति ग्रहाद्धूमादिः। तद्व्याप्तिबोधनप्रकारस्तु प्राचीनैरुक्तः
मिध अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते। साध्याभावोन्यथा व्याप्यो व्यापकः साधनात्ययः। व्याप्यस्य वचनं पूर्वं व्यापकस्य त
तः परं। एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्वतः इति। तत्रान्वयव्यतिरेकि लिंगपक्षधर्मत्वसपक्षसत्वविपक्षाद्व्यावृत्तित्वाबाधित
रूपा८ विषयत्वमसत्प्रतिपक्षत्वं चेति पंच[illegible]रूपोपपन्नानि। केवलव्यतिरेकिणि सपक्षाभावात्तद्भिन्नानि चत्वारि। केवलान्वयि नि ८
विपक्षाभावाद्विपक्षव्यावृत्तिभिन्नानि चत्वारि। पक्षतावान्पक्षः पर्वतादिः। निर्णीतसाध्यहेतुसहचारकः सपक्षः। निर्णी
तसाध्याभावको विपक्षः। विषयः साध्यं तस्याबाधितत्वं बाधाभावो यस्य हेतोस्तत्वं। सत्प्रतिपक्षः साध्याभावसाधको
हेतुस्तदभावोऽसत्प्रतिपक्षत्वं। [illegible]हेतुवदाभासाः ते चासिद्धविरुद्धानैकांतिकप्रकरण

तत्र प्रागुक्त २ मा१

पश्च र

समबाधिताः पंच। तत्रासिद्धस्त्रिधा। आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च। यत्र पक्षतावच्छेदकं पक्षे नास्ति स आद्यः यथा गगना
रविंदं सुरभि अरविंदत्वात् सरोजारविंदवत्। अत्र पक्षतावच्छेदकं गगनीयत्वं प्रसिद्धम् अरविंदे तन्नास्तीत्याश्रयासिद्धत्वं। पक्षे हेत्वभावः स
स्वरूपासिद्धः। यथा जलं रसवत् गंधवत्त्वा दिति। व्याप्त्यभाववान् व्याप्यत्वासिद्धः। यथा पर्वतो वह्निमान् नीलधूमादिति। अत्र नीलत्वस्य
स्प ४ व्यर्थत्वेन व्यर्थविशेषणत्वात् तदवच्छेदेन व्याप्त्यभावाद्व्याप्यत्वासिद्धेः। साध्यव्यापकाभावप्रतियोगी हेतुर्विरुद्धः। वह्निमान् द्रव्यात् गग
नादिति यथा। व्यभिचारी अनैकांतिकः। प्रतियोगिव्यधिकरणो वा व्यभिचारः। तद्वान् व्यभिचारी। स त्रिधा। साधारणोऽसाधारणो
नुपसंहारी च। विपक्षवृत्तिः साधारणः। यथा पर्वतो धूमवान् वह्नेरिति। विपक्षे अयः पिंडे वह्निरस्त्येव। सपक्षविपक्षव्यावृत्तो ऽसाधारणः
यथा शब्दो नित्यः शब्दत्वादिति। सपक्षे गगने विपक्षे घटादौ च हेतुर्नास्त्येव। अतो व्यतिरेकव्याप्त्या साध्यतदभावसाधनत्वाविशेषात् स
र्वहेतूपादकत्वाद्दूषणमयं। अवृत्तिसाध्यसाधकोऽनुपसंहारी। आकाशवान् धूमादिति यथा। तुल्यबलं साधकहेत्वंतरसहितः
सत्प्रतिपक्षः। यथा शब्दो अनित्यः। कृतकत्वात्। घटवत्। शब्दो नित्यो व्योमैकगुणत्वात् परिमाणवदित्यत्र पक्षे साध्याभावनिर्ण
घट- नि यो बाधस्तथाविधो बाधितः। उत्पत्तिकालीनो घटो गंधवान् पृथिवीत्वादिति। तत्र प्रमाणांतरेण गंधाभावनिर्णयाद्बाधितः॥
साध् एतेषां सत्प्रतिपक्षासाधारणौ विशेषग्रहणदशायामेव हेत्वाभासत्वापादकत्वादनित्यदोषौ। साक्षादनुमितिप्रतिबंधकोऽसत्त्वः
यद्यनुत्तरो ऽरि नाप्रमाणांतरेण व्याप्त्यादेः तत्र निर्णीतं बाधाभावश्चास्ति तदा दोषज्ञापनाच्च। शेषास्तु नित्यदोषाः बाधान्ये व्याप्त्या
दिविघटकाश्चेति तज्जनकज्ञानविघटकत्वेन दोषा इति नैयायिकाः। वैशेषिकास्तु। विरुद्धासिद्धसंदिग्धास्त्रयो हेत्वाभासाः। वि
रुद्धासिद्धसंदिग्धमलिंगं काश्यपोऽब्रवीदिति भाष्यात्। अनेनासिद्धविरुद्धसंदिग्धानध्यवसिता नामन्यदेशत्वमुक्तं भ
वतीत्यपि भाष्यात्वतारोवा। तत्रासिद्धश्चतुर्धा उभयासिद्धोऽन्यतरासिद्धः स्वरूपासिद्धोऽनुमेयासिद्धश्च। शब्दः नित्यः
सावयवत्वादित्याद्यः। कार्यत्वादिति [illegible] एव साधारणोऽप्यनैकांतिकः साध्यतद

साध्याभाववद्वृत्तित्वं। साध्यासमानाधिकरणधर्मिसमानाधिकरणत्वं। १२

भेक [illegible] ज्ञानेऽव्यस्या२ ति

भावसहचारेण भयसंदेहजनकत्वात्संदिग्धः। शब्दो नित्यः शब्दत्वादित्यनध्यवसितः साधारणधर्मदर्शनविप्रपं योरेव संशयजनकत्वेनास्य
प्राचीनैर्नं तर्भावादित्याहुः। हेत्वाभासानां ज्ञानेऽनुमानदूषणसंभवात्सर्वविषयत्वात्तत्रेण दूषणानि तेन सुवितद्वृत्तिसंमीलने पिनैकेनापरान्यथासि
द्धिः शंक्याव्यभिचारोन्नायकत्वेन परंपरोपयोगान्नहेत्वाभासांतरमुपाधिः। यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वं चेत्यस्य
४ लक्षणं। अस्तीदं धूमवाच्च वह्निरित्यत्रार्द्रेंधनं भवति हि [illegible] द्रव्यत्वविशिष्टो यत्र धूमस्तत्रार्द्रेंधनं। द्रव्यत्वविशिष्टो यत्र
यत्र वह्निस्तत्र त [illegible] न्नास्तीति द्रव्यत्वविशिष्टसाध्यव्यापकं तद्विशिष्टसाधनाव्यापकं च। एवं गर्भस्थो मित्रातनयः श्यामः मित्रातनयत्वात्सूतोऽस्य
न्नवदित्यत्र शाकपाकजत्वमुपाधिः। अत्रापि मनुष्यत्वावच्छिन्नं यत्र यत्र श्यामत्वं तत्र शाकपाकजत्वं मनुष्यत्वावच्छिन्नं यत्र यत्र मित्रातनयत्वं तत्र
शाकपाकजत्वं च नास्तीति भवति लक्षणसमन्वयः। एवं वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रापि बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकं तदवच्छिन्नसाधना
॥८॥ व्यापकमुद्भूतरूपवत्त्वमुपाधिरित्यलं पल्लवेन। ननु अनुमानं न प्रमाणं नाप्यनुमितिः प्रमा [illegible] तरो यत्र धूमस्तत्र वह्निरिति व्यक्तो [illegible] दर्शनाद्धूमवतानेन
पर्वतेन अयोयेन वह्निमता भाव्यमिति संभावनात एवानुमितिकार्याणि निर्वाहादिति चेन्न। वह्निमनुमिमि नोमीत्यनुभवसमानजातिविशेषसत्त्वा
दाश्रयानुमितेस्तत्कारणत्वेनानुभूयमानेन परामर्शस्य चापलपितुमशक्यत्वात्। तत्रैव प्रवृत्त्याविषयलाभे सति जातं ज्ञानं प्रमेति प्र
मात्वग्रहाच्च। विना बाधकं तदन्यथात्वस्य कल्पयितुमशक्यत्वादिति दिक्। उपमिनोमीत्यनुभवसिद्धजातिविशेषवत्युपमितिस्त
त्करणमुपमानं। तत्त्रिधा। सादृश्यविशिष्टपिंडज्ञानं वैधर्म्यविशिष्टपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानं चा तद्यथा।
पृष्टेप गवयादिशब्दः क्वचित्स्थले इति जानता कीदृग्गवय इत्यारण्यकेन गोसदृशो गवय इति तेन निवेदिते कालांतरे अरण्यं गतस्य
६४ तस्य इदं गोसदृशोऽयं पिंडः। एतादृशश्च गवयशब्दार्थ इत्याप्तेनोक्तं तस्मादयं गवयशब्दवाच्य इत्युपमितिर्जायते तत्र गो
सदृशोऽयं पिंड इति सादृश्यविशिष्टपिंडज्ञानं करणं। वाक्यार्थस्मरणमवांतरः। उपमितिः फलं। एवं कीदृशो ऽश्व इति पृष्टे गवादि
वद्विशफः स्वल्पपुच्छवानेति [illegible] आप्तोक्तनंतरं तत्पिंडदर्शनादयं द्विशफः स्वल्पपुच्छश्चेति ज्ञानात्प्रमवाक्यार्थस्मरणोत्तरमय
मश्वशब्दवाच्य इत्युपमितिज्ञानं उत्पद्यते तत्रैवं [illegible] ज्ञानं करणं वाक्यार्थस्मरणं व्यापारः शक्तिज्ञानं फलं। एवं की

त्वावच्छेदे ५ मुप १ न२

दृष्टाउष्ट्र इति प्रश्ने कंटकाशी अतिदीर्घग्रीवः इत्याप्तवाक्यस्मरणोत्तरं कालांतरे तद्धर्मविशिष्टपिंडदर्शनाद्वाक्यार्थस्मरणे सति उष्ट्रशब्द
वाच्योयमिति वाच्यवाचकभावग्रहो भवति सोयमिति फलं धर्मविशिष्टधर्मिप्रत्यक्षं करणं। वाक्यार्थस्मरणं व्यापारः। एवं कीदृशौषधी
सर्पविषहंत्रीति प्रश्ने नकुलदंष्ट्राधृतेत्याप्तोक्तानंतरं कालांतरे नकुलदंष्ट्राया मोषधीविशेषदर्शने सति एतादृशी सर्पविषहंत्रीति ज्ञानमु
त्पद्यते। तत्रैतादृशा विषहंत्रीति ज्ञानं फलं वाक्यार्थस्मरणमवांतरव्यापारः। नकुलदंष्ट्राधरणरूपासाधारणधर्मविशिष्टपिंडज्ञा
नं करणमिति सर्वं चोपमान [illegible] न शक्तिग्राहकत्वमिति प्रतारणं परास्तं। नवा आप्तवाक्यस्मरणाच्छाब्दबोध एवास्तु कुतः पृथ
गुपमानाभ्युपगम इति वाच्यं। शरीरवृत्त्यश्वत्वोष्ट्रत्वादिजातिविशेषरूपेण शाब्दबोधासंभवात्। सादृश्यमपि च छेदकीकृत्य
वाक्यस्य बोधकत्वात्। उपमिनोमीत्यनुव्यवसायो द्योतिनैयायिकाः। वैशेषिकास्तु। अयं गवयशब्दवाच्यः गोसदृशत्वादित्यनुमा
नानद्ग्रहः। आप्तवचनाच्च तथा व्याप्तिग्रहात्। उपमिनोमीत्यनुव्यवसायश्च संदिग्धः। सचेवा अनुमितित्वव्याप्यमेव तदस्तु
तथा च न पृथक्प्रमाणमित्याहुः। शब्दात्स्वयमीत्यनुभवसिद्धशाब्दत्वजातिमती शाब्दी। तत्करणं शब्दः प्रमाणं तथाहि।
रम११ वे११ घटं नय पटं मानयेत्यादि प्रयोज्यप्रयोजकवाक्याभ्यामेवतो बालस्यावापोद्वापाभ्यां घट पटादिव्यवहारं पश्यतः तद्व्यवहारेण
तदीयं ज्ञानमनुमितं तज्ज्ञानकत्वेनान्वयव्यतिरेकाभ्यां शब्दमवगच्छतोऽसंबद्धस्याबोधकत्वात्संबंधोस्तीत्यनुमितिर्भव
ति सच संबंधः शक्तिरुच्यते। एवमुपमानात्कोशादित्यस्तदनंतरमन्यत्रापि तद्ग्रहः। एवं घटादिपदे ग्रहे सति गृहीतशक्तिक
पदात्पदार्थोपस्थितावाकांक्षायोग्यतादिसहकारिवशाच्छाब्दप्रमा जायते। सा फलं। पदान्येव ज्ञायमानानि करणानि पदज्ञा
नं वा करणं पूर्ववत्। पदजन्यपदार्थोपस्थितिरवांतरव्यापारः इति। ननु गवादिपदानां वृद्धव्यवहारेण सन्निहितगवि
शक्तिग्रहे पिंडांतरीयापूर्वगोबोधः कथं। तत्र शक्त्यग्रहात्। शक्तिग्रहस्य कारणत्वाभावे अन्यथा गोशब्दादश्वबोधाप
त्तिरिति चेत्। न। सामान्यलक्षणया प्रत्यासत्त्या सकलगोव्यक्तेः शक्तिग्रहसमय एवोपस्थितौ सर्वत्रैव गोत्वादिविशिष्टे त
द्ग्रहणादोषात्। तथा च न्यायपक्षे [illegible] शक्तैकं स्वयति। मीमांसकास्तु गोत्वमेव

शक्तिः तदाश्रयत्वेन लक्षणया व्यक्तिबोध इत्याहुः। गव्येव शक्तिर्न तु गोत्वेपि गौरवात्। नापि गोत्व एव शक्तिर्गोर्विलक्षणेति युक्तं। गामानयेत्यत्रैव व्यक्ति
द्वयकल्पने गौरवात्। नन्वेवं गोपदाद्गोत्वबोधो न स्यादिति शंक्यं। अकार्यत्वेपि घटत्व
९ स्य कार्यतावच्छेदकत्वात्कार्यत्वसंबंधेन दंडात् घटोपस्थितौ घटत्वभानवदशक्यत्वेपि शक्यतावच्छेदकत्वाद्गोत्वोपस्थिति संभवादिति वैयाकर
णाः। नन्वेवमपि गौः शुक्लेत्यादौ पदार्थयोरभेदरूपोन्वयो न बुध्येत। तत्र शक्त्यभावात्। अशक्यस्याप्युपस्थितौ घटादेरपि तत्र बुध्येतेति चे
त्। सत्यं। अशक्यस्याप्यन्वयेस्त्याकांक्षा योग्यता च यत्र तत्र शाब्दबोधसंभवात्। तथाहि। यत्पदं यत्पदार्थेन सह यादृशान्वयबोधजनकं तत्पदस्य तेन समभिव्या
॥९॥ हारस्तादृशान्वयबोधे आकांक्षा। घटादिपदं विरुद्धविभक्तिरहितप्रातिपदिकार्थेन सह अभेदान्वयमेव बोधयतीति। द्वितीयाद्यर्थकर्मत्वादिभिः सह नि
रूपकत्वमाश्रयाश्रयिभावं वा। अतस्तादृशपदसमभिव्याहारोऽन्वयाकांक्षा। एतज्ज्ञानं च कारणं। घटपदं द्वितीयाद्यर्थेन सह स्वार्थ
भेदान्वयबोधकमिति ज्ञानवतो वैयाकरणस्य तथान्वयबोधात्। अन्यस्याभावाच्च। एवं योग्यता एकपदार्थेऽपरपदार्थस्य प्रकृत
संसर्गवत्वं। तेन पयसा सिंचतीति योग्यं। पयसि सेककरणतासत्वात्। वह्निना सिंचतीति न योग्यं। तत्र सेककरणत्वाभावात्। ता देवदत्तो
गौरित्यत्र देवदत्ते स्वामित्वरूपसंबंधसत्वाद्योग्यतापत्तेः प्रकृतसंसर्गत्वं। तथा च प्रकृतवाक्ये यः प्रतिपाद्यः संबंधस्तद्वत्त्वमित्यर्थः। स
चात्राभेदः स च नास्तीति न तद्योग्यं। अव्यवधानेनासत्तिः पदजन्यपदार्थोपस्थितिरेव। अतः प्रत्यक्षेण तंडुलं दृष्ट्वा नात्पचतीत्येवोक्ते तंडुलं प
चतीति न बोधः। पदाव्यवधानमासत्तिरिति प्राचीनमतेन युक्तं। गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्र योजनया अन्वयबोधाना
पत्तेः। योजनावाक्यादेवान्वयबोध इति चेन्न। प्रथमवाक्यस्य काव्यादौ योजनासापेक्षस्याबोधकत्वप्रसंगात्। योजनावाक्यं च
तात्पर्यग्राहकत्वेन प्रकरणादिवदुपयुज्यते। एवं चाकांक्षायोग्यतासत्तिवशात्पदार्थानां परस्परविशेषणविशेष्यभावावगाहि विशिष्टशा
ब्दबोधसंभवान्नानुपपत्तिरिति दिक्। मीमांसकास्तु कार्यान्वितेपदानां शक्तिः। तथाहि। प्रयोज्यप्रयोजकयोरानयनानयनादिव्यवहारं
पश्यतो बालस्यानयनानयनादिकार्यत्वेन ज्ञात्वाहं प्रवर्ते। एवमयमपि तथात्वेन ज्ञात्वा प्रवृत्तस्तज्ज्ञानं च शब्दादिति शाब्दस्तद्विशि
ष्टात्वा इति प्रथमं शक्तिग्रहात्। तथा च [illegible] विशेषात् तदुपस्थितौ विना बोधपर्यवसाना

भावाद्बोधकत्वमेव तत्कल्प्यानामर्थवादवाक्यावेदान्तवाक्यानामिति स्यात् ॥ वेदान्तितत्त्व [?] अन्विते पदानां शक्तिरित्यन्वयांशे बोधोपपत्तिः न
तु कार्यत्वांशे सर्वपदानां शक्तिः तस्य विशेषतस्तद्बोधकपदादेवोपस्थितिसंभवेन अर्थगौरवप्रसंगात् अतः कार्यत्वांशं विनापि मा
स्वरूपनष्टप्रयोजनवदाम्नायस्य बोधकत्वाद्वेदान्ताः प्रमाणमेवेति स्यात् ॥ पदानां पदार्थेष्विव वाक्यस्य संसर्गरूपे वाक्यशक्तिः अत एव तस्य
वाक्यार्थ इति किं वदन्तीति संगच्छत इति वैयाकरणाः ॥ मुख्यादितं चास्माभिर्मतं तदनिराकरणपूर्वकमेतन्मतं वैयाकरणभूषणे ॥ नन्वेवमपि
गंगायां घोष इत्यत्र गंगापदात्तीरप्रत्ययः कथं ॥ तत्र गंगापदशक्त्यभावादिति चेत् सत्यं ॥ लक्षणारूपवृत्त्यंतरात्तदुपस्थितिः ॥ अथ केयं
लक्षणा उच्यते शक्यसंबंधो लक्षणा गंगापदशक्यो गंगाप्रवाहः तत्संबंधस्तीरे स्त्येव तथा च स्वशक्यप्रवाहसंयोगरूप
संबंधेन गंगापदात्तीरोपस्थितिः ॥ स्वशक्येन सह नियमरूपा व्याप्तिरेव लक्षणा तदुक्तं अभिधेयाविनाभूतप्रवृत्तिर्लक्षणे
ष्यत इति मीमांसकाः ॥ तन्न मंचाः क्रोशंतीत्यत्र मंचपदस्य मंचस्थपुरुषे लक्षणा न स्यात् ॥ मंचपुरुषयोर्व्याप्त्यभावात् ॥
एवं यष्टीः प्रवेशयेत्यत्रापि द्रष्टव्यं ॥ वैयाकरणास्तु गंगादिपदानां तीरादौ शक्तिरेव सर्वेषां पदानां प्रायः सर्वत्रैव शक्तेः ॥ लक्षणा
च स्वतंत्रवृत्तिर्नास्त्येवेति स्यात् ॥ प्रपंचितं चैतद्वैयाकरणभूषणे ॥ ननु केयं शक्तिः ॥ अभिधानामकं पदार्थांतरं संकेतग्राह्यमिति मीमां
सकाः ॥ सिद्धांतस्तु घटपदाद्घटो बोद्धव्य इति ईश्वरेच्छारूपः संकेतः शक्तिः सा च पूर्वोक्तरीत्या वृद्धव्यवहाराद्ग्राह्या वृद्धानां तद्ग्रह
इति सृष्ट्यादावीश्वरात्तद्ग्रह इति ॥ आधुनिकपुत्रादिषु संकेतितदेवदत्तादिपदे च पित्रादिसंकेतात् तद्ग्राह्या ॥ द्वादशेऽह्नि पिता नाम कु
र्यादिति शास्त्रसिद्धत्वात्तत्रापि सास्त्येवेति दिक् ॥ एवं शाब्दबोधे तात्पर्यज्ञानमपि हेतुः ॥ अन्यथा सैंधवमानयेत्यस्य भोज
नप्रकरणे लवणतात्पर्यग्रहसत्त्वे अश्वबोधप्रसंगात् ॥ न च शुकबालादीनां तात्पर्याभावेन तदुच्चरितशब्दाद्बोधो न स्यादि
ति वाच्यं तत्रापीश्वरतात्पर्यसत्त्वात् ॥ तच्च तात्पर्यं वेदे मीमांसान्यायगम्यं नियतं ॥ लोके तु वक्तुरिच्छाधीनमनियतमत एकस्मादे
व शब्दात् श्लेषादिवाक्ये अनेकार्थबोधः ॥ यथा श्वेतो धावतीत्यादौ ॥ नन्वेवमपि गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः ॥ म
मापि जन्म तत्रैव भूयाद्यत्र गतो भवान् इत्यत्र च यद्गमनसातीव यो मे प्राणहानिरिति प्रतीतिः कथमिति चेत् ॥ व्यंजनाख्य
मौ१

वृसंनरात्तद्बोधइत्याहुः कारिकाः। एवंगतोस्तमर्कइत्युदासीनवाक्येपिनानाविधास्तत्तत्स्वरूपीयबोधाएवमेवसंगच्छंतेइति। दर्श
निकास्तुअनुमितिरूपाः लक्षणयाशाब्दाद्बोधाः संभवंतीति व्यंजनाख्यवृत्त्यंतरकल्पनां नसहंते। नन्वेवमपिभाषाशब्देभ्यः
कथमर्थबोधः तत्रशक्तिलक्षणयोरभावादितिचेन्न। तैःसंस्कृतस्मरणं ततोबोधइत्यभ्युपगमात् इतिकेचित्। संस्कृतकथामप्रवि
॥१०॥ दुषांबोधान्नैवं। किंतुतेष्वेवशक्तिभ्रमाद्बोधइतिनव्याः। संस्कृतवद्भाषाशब्दावाचकाएवेति वैयाकरणमतंतु न्यक्षेणास्माभिःप्रपं
चितं। एवंचभाषाप्रावृत्तवृत्तिमत्त्वमेवसाधुत्वमिति मीमांसकादिमतं। अर्थविशेषव्याकरणसुसाध्यंतदिति तुनैयायिकाः। साधूनेवप्र 10
युंजीतेतिवचनसिद्धं पुण्यजनकत्वंतदिति वैयाकरणाः इत्यलंपल्लवेन। नन्वेवमपिपदज्ञानमेवनसंभवति वर्णसमूहः पदं वर्णाश्च
क्रमिकाःक्षणिकाश्च। तथाचद्वितीयवर्णोच्चारणसमये पूर्वोनष्टइति कथंसमुदायज्ञानं। यत्तुअन्त्येकृते तद्वर्णानुभवोत्तरं
तेसमूहालंबनरूपंसकलवर्णस्मरणमेवपदज्ञानमिति। तन्न। एवंसति तत्रक्रमाभावात् सरोरसः जाराराजेत्यादौ
विशेषप्रसंगादितिचेत्। उच्यते। प्रथमंश्रोत्रेणघकारज्ञानेसति तदुत्तरमकारज्ञानेजायमाने स्वाव्यवहितोत्तरत्वसंबंधेनपूर्ववर्णो
विशेषणतयाभासते। ततष्टकारे घकारविशिष्टाकारोपि विशेषणं। सोपि स्वर्वद्वयविशिष्टः स्यात् तस्मात् भवति पदज्ञानं ततस्ता
दृशार्थोपस्थितिस्ततउक्तप्रकारेण पुनः पदांतरज्ञानं ततस्तदर्थोपस्थितौ तयोः परस्परं अन्वयबोधः। पुनःपदांतरज्ञानेन
तःपदार्थोपस्थितौ तस्याप्यन्वयबोधइत्येवंक्रमेण अवांतरवाक्यार्थज्ञानपूर्वकोमहावाक्यार्थबोधइति राजपुरप्रवेशन्या
येनकेचनाहुः। तदुक्तं। यद्यदाकांक्षितंयोग्यंसन्निधानंप्रपद्यते। तेनतेनान्वितःस्वार्थः पदैरेवावधार्यतइति। इदंतुबोध्यं। ला
क्षणिकेनानुभावकं। तत्तदर्थविषयकशाब्दबोधंप्रति वृत्त्यातदुपस्थापकपदज्ञानत्वेनहेतुत्वे गोरवाच्छक्तिलक्षणान्यतर
स्यवृत्तित्वात्। शक्त्यातदुपस्थापकपदज्ञानत्वेन हेतुत्वे लाक्षणिकपदजबोधे व्यभिचारः स्यादितितत्तदर्थविषयकशाब्दं तरा
त्वयप्रतियोग्युपस्थापकपदज्ञानत्वेनहेतुत्वंवाच्यं। उपस्थापकत्वंचशक्त्या। इत्थंच गंगायांघोषइत्यत्र तीरबोधः स्तीरान्वयप्र १०
तियोग्युपस्थापकाधारत्ववाचकसप्तमीज्ञानादेवेति ...

... अन्यत्तुसर्वपदार्थानां प्रथमंतत्तत्पदज्ञानात् सर्वपदानांसमूह

लंबनस्मरणं तत्तत्तदर्थानामपि समूहालंबनरूपोपस्थितौ ससंसर्गः प्रथममेव महावाक्यार्थबोधः खलेकपोतन्यायेनेत्याहुः। सोऽयं शाब्दबोधश्च
तुर्धा। विशेष्ये विशेषणं तत्र विशेषणांतरमित्येकः। रक्तदंडवानिति यथा। पुरुषे दंडः तत्र रूपं विशेषणं। विशिष्टस्य वैशिष्ट्यावगाह्यन्यः। यथा रक्तदंडवा
निति सैव रक्तत्वविशिष्टस्य दंडस्य वैशिष्ट्यबोधे। एकत्र द्वयमिति न्यायेनान्यः। दंडी कुंडली देवदत्त इति यथा। एकविशेषणविशिष्टे विशेषणांतर
वैशिष्ट्यावगाह्यपरः। खड्गी शूर इति यथेति। विस्तरस्तु ग्रंथांतरादवधेयः॥ ॥अर्थापत्त्या मीत्यनुभवसिद्धजातिविशेषवत्यर्थापत्तिस्तत्कारणमर्थाप
त्तिप्रमाणं। तच्चानुपपत्तिज्ञानं। तथाहि। देवदत्ते पीनत्वं दिवाभोजनाभावं च जानतो रात्रिभोजनज्ञानं जायते। तन्न प्रत्यक्षात् सन्निकर्षाद्यभावेनानुप
लंभात्। नानुमानात्। तस्यासंभवात्। अयं रात्रिभोजी पीनत्वादित्यस्य दिवामात्रभुंजाने व्यभिचारित्वात्। दिवाअभुंजानत्वे सति पीनत्वादित्यत्र दृष्टा
ताभावेन व्याप्तिग्रहादनुमित्ययोगात्। तस्माद्दिवाअभुंजानस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनज्ञानं जायते सैवार्थापत्तिरिति प्राभाकराः। देव
दत्तो रात्रिभोजी दिवाअभुंजानत्वे सति पीनत्वात् यत्र रात्रिभोजनाभावस्तत्र दिवाअभुंजानत्वे सति पीनत्वाभाव इति व्यतिरेकिणैव निर्वा
हे पृथगर्थापत्तिः प्रमाणमिति वैशेषिकनैयायिकादयः॥ ॥अनुपलब्ध्या जानामीत्यनुभवसिद्धजातिविशेषवत्यनुपलब्धिः [redacted]
णमनुपलब्धिः। सा चोपलब्ध्योर्निर्णयात्मकज्ञानस्याभावः। तथाहि। वस्तुतो घटाभाववति घटोऽस्तीति भ्रमसमये घटाभावेन सह सन्निकर्षे स
त्यपि तज्ज्ञानं नोत्पद्यते। अतस्तत्र घटानुपलब्धिः कारणं। तदभावान्न तत्र ज्ञानं। चक्षुरादिकं चाधिकरणादिग्रहणार्थमनुपलब्धेर्यो
ग्यतासंपादनार्थं चोपयुज्यते। योग्यता च यद्यत्र घटः स्यात् उपलभ्येतेति तर्कसंपत्तिरेवेति भाट्टाः। एतादृश्यनुपलब्धिः प्रत्यक्षसहकारिण्ये
वातो नानुपलब्धिः प्रमाणांतरं। पृथक्प्रमाणांतरकल्पने गौरवादिति नैयायिकादयः। वस्तुतो घटवति घटाभावनिर्णये सति घटच
क्षुःसंयोगसत्यपि घटज्ञानानुत्पत्तेरभावानुपलब्धेरपि भावग्रहहेतुतापत्तिः। न चेष्टापत्तिरपसिद्धांतात्। प्रमाणाभावाच्च। विवेचितं चैत
दन्यत्र। तस्मान्नानुपलब्धिः सहकारिणी न वा प्रमाणांतरमिति तत्त्वं। संभावनया जानामीति प्रतीतिसिद्धजातिमती सांभवी न करणं
संभवः। यथा ब्राह्मस इति श्रुतेर्विद्यायाः शतं संतीत्युक्ते दशादिसंभव्याप्यः प्रतीतोऽस्य ज्ञातकर्तृकं प्रसिद्धं वाक्यमैतिह्यं। गंगेयं मथुरेयं वेदोय
तिज्ञानमैतिह्यादेव। अन्यस्याप्रसरादि [illegible] विषयतामात्रान्तकोटिकः संशय एव। शते दशेति तु अनुमानम्

युनिर्दिष्टप्रकारादप्यावयवे ... तिसर्वं ... यदेवदेवमूर्वताम्रत्ववेदुत्यनेयमः ॥

तथा व्याप्तिज्ञानवृत्तामेव ज्ञायमानत्वात् । ऐतिह्यं च प्रमाणं नेष्टम् एव । अन्यथा प्रमाणमेव नेति दार्शनिकाः । एतादृशचेष्टयेत्थमर्थो बोद्धव्य इति संकेतितचे-
ष्टातो बोधस्तु लेखतया शब्दोपस्थितिस्ततो बोधः शाब्द एव । अन्यथा चेतादृश्या चेष्टयानुमानमेवेति न हस्तनेत्रादिचेष्टातो बोधानुरोधात् [illegible] प्रमा-
माणत्वमपीति तांत्रिकाः ॥ ॥ तदेतैः प्रमाणैर्जायमाना बुद्धिरनित्यैव । मानसप्रत्यक्षात् । जानामीति मनसानुभवात् । प्राभाकरास्तु सर्वा बुद्धिः स्वप्रकाशा विष-
ना॰ य विषयिणी च । आत्मा स्वात्मा विषयश्चेति त्रयं घटमहं जानामीति सर्वत्रानुभवात् । ज्ञानस्य परप्रकाश्यत्वे तदपि परप्रकाश्यं तदपि परप्रकाश्यमित्यज्ञेयमा-
नं ज्ञानस्वीकारादन्धपरंपरानिरोधाय भावो वा स्यादित्याहुः । भाट्टास्तु ज्ञानेन विषये ज्ञातता जन्यते । ज्ञातो घट इत्यनुभवात् । धात्वर्थक्रियाजन्यफलशालित्वेन
घटं जानातीत्यादौ कर्मत्वमप्येवमेव संगच्छते । तथा च तया ज्ञाततया ज्ञानमनुमीयते घटो ज्ञानविषयो ज्ञाततावत्त्वादिति । एवं चातीन्द्रियं ज्ञानमित्याहुः ।
। एवं स्वप्रकाशविधया ज्ञाततया वा ज्ञानं गृह्यमाणं तद्गतं याथार्थ्यरूपप्रामाण्यमपि गृह्यते । ज्ञानग्राहकसामग्रीग्राह्यत्वरूपस्वतस्त्वस्य तत्राप्युपग-
॥११॥ मात् इति । मीमांसकाः । नैयायिकास्तु एवं सति जातं मे ज्ञानं प्रमा न वेति संशयानुपपत्तेर्नेदं युक्तं । किंतु मनसा ज्ञानं गृह्यते पुनर्विषयलाभोत्तरं जातं ज्ञानं प्रमा
फलवत्प्रवृत्तिजनकत्वादित्यनुमानात्तद्ग्रहः । मीमांसकानामर्थविसंवादप्रयुक्ताप्रामाण्यग्रहवत् । अन्यथा तस्यापि स्वतो ग्राह्यत्वापत्तिरतो ज्ञा-
न ग्राहकविशेषग्राह्यत्वरूपं परतः प्रामाण्यमाहुः । भक्तिश्रद्धादयोऽपि बुद्धिभेदाः । तत्राराध्यत्वेन ज्ञानं भक्तिः । वेदबोधितफलवत्त्वेमा-
वान्निर्णयः श्रद्धेत्यन्यत्र विस्तरः । सुखत्वजातिमदिच्छाभावान्यतावच्छेदकजातिमद्वा निरुपाधिप्रेमास्पदं वा सुखं तच्च द्विविधं वै-
षयिकं मानोरथिकं माभ्यासिकमाभिमानिकं च । विषयसाक्षात्कारजमाद्यं । विषयध्यानजं मानोरथिकं । सूर्यनमस्काराद्यभ्यासजामि-
मानं शरीरलाघवादिरूपं तृतीयं । द्रव्यपांडित्यगर्वजमंत्यं । एवं दुःखमपि द्रष्टव्यं । दुःखत्वजातिमत् निरुपाधिद्वेषास्पदं वा दुःखं । इच्छामीत्य-
नुभवसिद्धेच्छात्वजातिमतीच्छा । सा च सुखमोक्षयोः सुखदुःखाभावत्वप्रकारकज्ञानादुत्पद्यते । तत्साधनेषु सुखदुःखाभावसाधनता-
ज्ञानादेव । स्त्रीपुत्रादौ सैन्यासादौ च यथा । द्वेष्मीत्यनुभवसिद्धजातिमान् क्रोधापरपर्यायको द्वेषः । यतत इत्यनुभवसिद्धयत्नत्वजातिमा-
न् यत्नः । स द्विधा । जीवनयोनिरन्यश्च । जीवनादृष्टयोनिः कारणं यस्य स आद्यः । सर्वदा प्राणसंचारकारी । गुरुभारोत्तोलने भावना-
दौ प्रयत्नविशेषात्क्लेशसत्क्रियाविशेषवदर्शनाद्विशेषयत्नः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपीति न्यायेन आत्मक्रियासा- ॥
मान्ययत्नसामान्यजन्यत्वं द्वितीयो द्विधा । एको द्वेषजः सर्पादि [illegible] तिरिपतन्नन्द्वेषजः किंतु तन्मरणेच्छाजः इच्छाजन्यः
२ २

१५

त्निद्रादिसकलजनादिकस्य तस्यावश्यकत्वात्॥ स चातींद्रियः॥ एतौ प्रत्यक्षौ। एते बुद्धीच्छाप्रयत्ना ईश्वरीया नित्याः जीवानामनित्याः। विहितमात्रादि जे
जन्यतावच्छेदकजातिमान् धर्मः। ज्योतिष्टोमयज्ञादिजन्यतावच्छेदिका विलक्षणस्वर्गादिजनकतावच्छेदिकाश्च॥ न तदुद्देशे विलक्षणाः ननु
धर्मत्वमेका जातिर्माना भावात्॥ धर्मत्वेन सुखत्वेन कार्यकारणभावे मानाभावादिति। अत एव बाधकाभावात् विज्ञानमानंदं ब्रह्मेति श्रुतेश्चोपरे तन
संसुखमस्तीति वेदांतिनः। निषिद्धपरदारगमनादिजन्यतावच्छेदकजातिमान् अधर्मः। धर्मत्ववदेता अपि नानानंतं तु दुःखजनकतावच्छेदिकाश्च। ननु
यज्ञादिजन्यातींद्रियधर्माधर्मयोः किं मानं। उच्यते। इष्टसाधनत्ववा विनाविधिना अनिष्टसाधनत्वबोधकनिषेधेन यागपरदारगमनादेस्तत्फ
२६ त्वं बोध्यते॥ न च चिरं नष्टस्य कालांतरभाविस्वर्गादिसाधनत्वं साक्षाद्युक्तमतो व्यापारत्वेनैवमुपेयौ॥ न च यागादिध्वंस एव व्यापारोस्त्विति वाच्यम्॥ एवं
लाभे हि काराणीभूताभावप्रतियोगित्वेन यागादेः प्रतिबंधकत्वे पत्तेः। किं च कीर्तितधर्मादपि फलापत्तेः। व्यापारसत्वात्। अकीर्तितयागत्वेन कारणत्वे तेन
कीर्तितात्सकलमिति चेत्॥ न॥ फलानंतरं कीर्तितादपि फलानापत्तेरिति दिक्॥ एतौ धर्माधर्मौ त्रिविधौ॥ संचितौ क्रियमाणौ प्रारब्धसंज्ञौ। तत्रैत
च्छरीरारंभकं प्रारब्धं कर्म तद्भोगेकनाश्यं जीवन्मुक्तिशास्त्रानुरोधात्॥ अन्यद्वयं ज्ञाननाश्यं ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति शास्त्रा
दिति वेदांतिनः। सिद्धांतस्तु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति वचनस्य प्रायश्चित्तना
श्यव्यतिरेकेण संकोचे प्रमाणाभावात्संचितस्यापि कायव्यूहेन भोगादेव नाशः। भस्मसात्पदं तु लाक्षणिकं शीघ्रमेव भोगान्नाशं उद्दि
शतीति दिक्॥ क्रियमाणं च ज्ञानिनां नो संचयते॥ लिप्यते न स पापेन पद्मपत्रमिवांभसेति वचनात्। नन्वेवं योगिभिः क्रियमाणक
र्मणो वैयर्थ्यापत्तिरिति चेन्न॥ तस्य लोकसंग्रहमात्रार्थत्वात्॥ वस्तुतस्तु तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति
श्रुतेस्तस्य परार्थत्वं स्फुटमित्यवधेयं॥ ॥संस्कारत्वजातिमान् संस्कारः। स त्रिधा॥ वेगो भावना स्थितिस्थापकश्च॥ वेगेन गच्छतीति प्रत्ययसि
द्धवेगत्वजातिमान् वेगः। मूर्तमात्रवृत्तिः। भावनाच स्मृतिजनकः स्वजन्यस्मृतिनाश्यश्च संस्कारः। आत्मवृत्तिरतींद्रियः पूर्वज्ञानजन्यः। न च ही
नस्यानुभवत्वेनैव कारणतेति प्राञ्चः। नव्यास्तु सकृदनुभूतस्य स्मरणोत्तरं संस्कारनाशे न पुनर्विनानुभवमस्मरणप्रसंगात् पुनःपुनःस्मर
णाद्दृढतरसंस्कारोत्पत्तेरनुभवसिद्धत्वात्। अनुमितिशाब्दबोधे सत्यपि स्वर्गं निरूप्यानुभवामीति प्रतीतेरनुभवत्वजातौ प्रमाणाभावे न स्मृत्य

न्यज्ञानत्वरूपस्यानुभवत्वस्य कारणतावच्छेदकत्वे गौरवापत्तेस्ततोपि लाघवात्तज्ज्ञानत्वेनैव तत्कारणत्वमित्याहुः॥ यथा स्वप्नः पुनः पुनः स्मरणस्थले स्म
रणादेव दृढतरसंस्कारोत्पत्तिरिति॥ एतेषां पूर्वानुभवतज्जन्यसंस्कारतज्जन्यस्मृतीनां समानविषयत्वमतो न घटज्ञानात्पटः स्मृतिः॥ स्थितिस्था
पकश्च यथास्थितवस्तुस्थित्यानुमेयः पृथिवीवृत्तिरितीदृग्पक्षः॥ शब्दश्च श्रोत्रमीत्यनुभवसिद्धशब्दत्वजातिमान् शब्दः स द्विधा॥ ध्वनिर्वर्णश्च॥
तत्र ध्वनिः संगीतशास्त्रसिद्धानेकभेदवान्॥ तत्कारणं मृदंगवीणादिः॥ वर्णः ककारखकारादिः॥ उभयत्राप्याकाशः समवायिकारणं॥ भे
॥१२॥ र्याकाशसंयोगस्तालव्योष्ठाकाशसंयोगवंशदलाकाशविभागादिरसमवायिकारणं॥ जिह्वाताल्वादिसंयोगवंशदलविभागादिर्निमित्त
कारणं॥ कश्चिच्च शब्दोपि शब्दासमवायिकारणं॥ दूरभेरीताडनस्थले॥ तत्र भेर्याकाशसंयोगादुत्पन्नस्तारतरो न दूरस्थपुरुषीयश्रवणगो
चरः॥ तस्य मंदत्वेनानुभवात्॥ किंतु भेरीशब्दाद्वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दाच्छब्दस्तस्मादन्य इत्येवं मंदादिभावेन जायमानेषु
स्वश्रोत्रावच्छिन्नोत्पन्नः स्वयं गृह्यते तेषु पूर्वपूर्वशब्दोऽसमवायिकारणं॥ स च स्ववृत्तिभेर्यादिप्रयोज्यजातिमंतं जनयतीति भेरीशब्दो मया
श्रुत इति धीर्न विरुध्यते॥ तथा चासमवायिकारणत्रैविध्याद् द्विविधापि त्रिधेति फलितं॥ उक्तं च॥ संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरि
ति॥ सोयं शब्दो द्विक्षणस्थायी॥ क्षणांतरमनुपलंभात्॥ नाशकानुरोधाच्च॥ स्वजन्यः शब्द एव स्वनाशकः॥ स चोत्पत्तिद्वितीयक्षणे स्व
नाशयतीति सर्वो द्विक्षणस्थायिनः॥ अंत्यस्य च जनकशब्दो नाशकः॥ सुंदोपसुंदन्यायेन॥ ते तु क्षणिका एव वांत्यशब्द इत्येके॥ अन्ये
शब्दउपांत्यशब्दनाशनाश्य इति सोपि द्विक्षणस्थाय्येवेत्यन्ये॥ सर्वसाधारण्यात् निमित्तवायुसंयोगनाश एव शब्दनाशकः॥
तथा च वायुसंयोगस्ततः पूर्वक्रियानाशे शब्दोत्पत्तीततः क्रियापूर्वदेशविभागसंयोगनाशशब्दनाशा इति क्रमेण नाशाच्छ
ब्दः चतुःक्षणस्थायीति नव्याः॥ सोयं शब्दो नित्य एव॥ सोयं गकारः शिवेनोक्तः स एव विष्णुनोच्यते॥ प्रहरात्पूर्वमुक्त एवेदानीमु
च्यत इति प्रत्यभिज्ञानात्॥ किंतु च॥ योयं काश्यां हकारः श्रुतः स एव सतावनेनोच्यत इति प्रतीतिः सर्वत्र व्यापिनस्तस्यानुभ १२
वात्॥ विभुत्वाच्च द्रव्यमेव सः॥ यो यं तारो मया श्रुतः स एव मंदः श्रूयत इति प्रतीतिस्तारत्वादिकमपि तत्र न विरुध्यत इति मीमांसकाः॥

उत्पन्नो गकारो नष्टो गकार इति प्रतीतेरुत्पत्तिनाशवानेव शब्दः। सोयमित्यत्र तज्जातीयोयमिति भासत इति नैयायिकाः। नत्वं वैयाकरणभूषणे
स्माभिः प्रपंचितं। संयोगविभागयोरनपेक्षकारणं कर्म-त्वोत्तरभाविभावजन्यसंयोगविभागजनकमित्यर्थः। तेन कर्मणा संयोगे जननीये तोत्तरमुत्प
द्यमानस्य विभागस्य प्रतिबंधकीभूतपूर्वसंयोगध्वंसस्य चापेक्षायामपि न क्षतिः। विभागस्य प्रतिबंधकाभावसंपादकत्वेनान्यथासिद्धत्वे नाजनकत्वा
त्संयोगध्वंसस्य भावत्वाभावात्। न वासमवायिकारणाद्येष्व पूर्वोत्पन्नस्यापेक्षितत्वे दोषः। संयोगजसंयोगे पूर्वसंयोगस्य विभागजविभागे पूर्वविभाग
११५ गस्य तथा प्रत्येकं जनकत्वसत्वात्संयोगविभागेत्युभयमुपात्तं। उभयजनकत्वं कर्मण एव न संयोगादेरिति नातिव्याप्तिः। तच्चोत्क्षेपणापक्षेपणाकुंचनप्रसारणगम
नभेदात्पंचधा। भ्रमणादयस्तु गमनभेदा एव। तच्च मूर्तमात्रवृत्ति। मूर्तत्वेनैव तत्कारणत्वात्। अत एव कर्मसमवायिकारणतावच्छेदकतया मूर्तत्वं जा
तिरेवेति नव्याः। इयत्तावच्छिन्नपरिमाणवत्त्वमुपाधिरेवेति प्राचः। नित्यं समानानां भावः सामान्यं। अनेकानुगतो धर्म इति यावत्। (ने
कं च समवायेन शब्दाद्येवेति न सामान्यं। तद्द्विधा। जातिरुपाधिश्च। तत्राद्यलक्षणं प्राञ्चमाहुः)
तत्र संयोगवेगप्रयत्नगुरुत्वद्रवत्वस्थितिस्थापकासमवायिकारणकं। धनुःसंयोगादिषौ प्रथमं कर्म ततो वेगः कर्मजः ततः पुनः क
र्म द्वितीयं। आगमनं तृतीयं। पतनं चतुर्थं। स्पंदनं पंचमं। परमाणौ द्व्यणुके यथास्थितहेतुः कर्म। स्वजन्यसंयोगनाश्यं। अत एव
क्षणचतुष्टयस्थायि विभागनाश्यं चेति प्रपंचितमन्यत्र। नित्यमेकमनेकसमवेतं सामान्यं। यथा घटत्वादिः। घटत्वं हि नित्यमेकमनेकघटेषु समवे
तं चेति लक्षणसमन्वयः। तद्द्विधा। जातिरूपमुपाधिरूपं च। तत्र जातिः समवायेनैव वर्तते। उपाधिरनेकपदार्थघटितो धर्मः। यथा कारणत्वमन्यथासिद्धत्वा
दिः। अन्यथासिद्धत्वं चावश्यकक्लृप्तमानपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतत्वं निष्कृष्टमणुत्वं। प्राचस्त्वन्यथाप्याहुः। यथा अन्यत्र क्लृप्तनियतपूर्व
वर्तिन एव कार्यसंभवे तत्सहभूतत्वं। यथा रासभतन्तुरूपादेः। अन्यं प्रति पूर्ववर्तित्वे गृहीत एवान्यं प्रति पूर्ववर्तितया गृह्यमाणत्वं वा। यथा कुलालपित्रा
देः। एवं भावत्वाभावत्वेन्द्रियत्वविषयत्वादिकमपि। तत्र समवायैकार्थसमवायान्यतरसंबंधेन सत्तावत्त्वं भावत्वं। उक्तसंबंधेन सत्ताभाव एवाभावत्वं। ज्ञानजनकमनः
संयोगाश्रयातीन्द्रियत्वमिन्द्रियत्वं। इन्द्रियमनोयोगस्य ज्ञानजनकताल्लक्षणसमन्वयः। आत्ममनोयोगस्य ज्ञानहेतुत्वादात्मन्यतिव्याप्तेर्वारणायातीन्द्रियेति
मिति। विषयतासंबंधेन साक्षात्कारवत्त्वं विषयत्वं। शरीरादेरपि ... करात्। एवं कारणत्वावान्तरं समवायिकारणत्वमसम

वायिकारणत्वं निमित्तकारणत्वं च। समवायेन कार्याधारत्वमाद्यं। तच्च द्रव्यमात्रवृत्ति द्रव्यत्वस्यैव कार्यसमवायिकारणतावच्छेदकत्वात्। समवायैकार्थसमवायप्रत्या
साकारणत्वमसमवायिकारणत्वं। यथा पटे तंतुसंयोगस्य पटरूपे तंतुरूपस्य। उभयान्यकारणत्वं निमित्तकारणत्वं। यथा घटे दंडादेः। रूपरसगंधस्पर्शस्नेहबुद्धिसु
खदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्देषु विशेषगुणेषु। तत्र स्वाश्रयव्यावृत्त्योपायिकावांतरसामान्यवत्त्वं। पृथिवीजलादिष्वभिधीयते पाकजरूपात्। तेजः इत्येवाभि
धीयते। शुक्लभास्वररूपात् उष्णस्पर्शाद्वा इत्यादि। स्वाश्रयस्य व्यावर्तकतावच्छेदकत्वेनोपयुक्तमवांतरजातिमत्त्वमस्तीति लक्षणसमन्वयः। एवं निरूप्य नामोल्ला
॥१३॥ पूर्वीकासहरणं। नन्वेवं पृथुबुध्नोदराकारत्वं गंधवत्त्वगुणाश्रयत्वसास्नादिमत्त्वाद्युपाधिरेव घटः पृथिवी द्रव्यमित्यादिप्रतीत्युपपत्तेः घटत्वादिजातौ किं मानमि
ति चेत् उच्यते। कारणत्वकार्यत्वादयस्तावत्स्वावच्छिन्नाः तथा च कार्यतावच्छेदकतया गंधस्य कार्यमात्रस्य च कारणतावच्छेदकतया दानहननादिभिः
13 तुल्यपापोत्पत्तेः तत्कारणतावच्छेदककोटिप्रविष्टतया च घटत्वपृथिवीत्वद्रव्यत्वगोत्वादिकमावश्यकं। उपाधेः कृतत्वेऽपि गौरवेणावच्छेदकत्वासं
भवात् बाधकाभावे वच्छेदकत्वं लघुधर्मस्यैव वर्तत इति सिद्धांतात्। एवं बाधकाभावे अनुगतप्रतीत्यापि तत्सिद्धिः। सत्त्वबाधकसंग्रहः प्राचीनैरु
क्तः। व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रह इति। घटत्वात् कलशत्वं न पृथक् जातिः अभेदात्। एवमेस्तित
द्रव्यत्वाद्गुणाश्रयत्वं न पृथक् जातिः तुल्यव्यक्तिकत्वात्। शरीरत्वं न जातिः पृथिवीत्वादिना संकरप्रसंगात्। परस्परात्यंताभावसमानाधिक
दी॥ रणयोरेकत्र समावेशः संकरः। पृथिवीत्वं विना तेजसादिशरीरे शरीरत्वं वर्तते शरीरत्वं विना च घटादौ पृथिवीत्वं तदुभयं मनुष्यादिशरीरे। सा
मान्यत्वं न जातिः तत्रापि सामान्यस्वीकारे अनवस्थाऽनाश्रयान्यतरापत्तेः। आकाशत्वं घटो वा न जातिः नित्यमेकमनेकसमवेतं सामान्यमिति लक्षणहानात्। अ
तएवाभावः सास्नादिमत्त्वं वा न जातिः। समवाय उक्तलक्षणाक्रांतोऽपि न जातिः संबंधविरहात् संबंधिभिन्नत्वे सति संबंध्याश्रयत्वस्यैव संबंधत्वेन स्वरूपसंब
धे संबंधव्यवहारस्य गौणत्वात् स्वरूपसमवायेन वृत्तित्वाभ्युपगमेऽपि न क्षतिः इति। तच्च सामान्यं त्रिविधं। परमपरं परापरं च। सकलसामान्यव्यापकं परं।
सत्ता यथा। सामान्यांतराव्यापकमपरं। परिमाणभेदेन भिन्नेषु बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादि यथा। कस्यचित्सामान्यस्य व्यापकं कस्य
चिद्व्याप्यं परापरं। द्रव्यत्वादि यथा। पृथिवीत्वादेर्घटत्वादेर्व्यापकं सत्ताव्याप्यं च तत इत्यन्यत्र विस्तरः॥ ॥नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। समान
जातीयरूपरसादिमत्परमाण्वादीनां परस्परं भेदकं विना भेदनिर्णयासंभवाद्भेदकत्वेन विशेषा अनुमीयंते। अनित्यद्रव्ये त्ववयवभेदेनैव १३

भेदसंभवात् तत्र तेषु प्रमाणाभावान्नित्यद्रव्यमात्रवृत्तित्वे तेषां व्यावर्तकांतराभावे स्वयं ते व्यावर्तकत्वेन स्वीक्रियमाणत्वादनवस्थेति लक्षणसमन्वयः॥ य
था प्रजारक्षणकर्तृत्वेन महाराजस्यावश्यकत्वः। स च स्वत एव स्वरक्षणसमर्थः। एवं विशेषाः स्वत एव व्यावृत्ता इति नानवस्था। शब्दसमवायिकारणतावच्छेदकत
या वाकाशत्वसिद्धिः। अष्टद्रव्यातिरिक्तद्रव्यत्वादिराकाशमात्रवृत्तित्वेपि गौरवेणाकारणतावच्छेदकत्वासंभवेन द्रव्यत्वादिजातिवत्तस्यावश्यकत्वादिति दिक्॥
अयुतसिद्धानां संबंधः समवायः। विशेषणतान्यसंबंधेन यावद्द्वयसत्त्वं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ। यथा गुणगुणिनौ पटो सतेः पूर्वं तन्तु
सत्वादव्याप्तेर्वारणायान्येति। वायुरूपाभावकाले घटादेरयुतसिद्धत्ववारणाय पूर्वविशेषणतान्येति। अभावस्य स्वविशेषणतैव संबंध इत्युक्तं कालो
पि विशेषणतयैव जगदाधार इति स्पष्टमन्यत्र। प्राक्तनविनाशक्षणपर्यंतं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ। तदुक्तं। तावेवायुतसिद्धौ द्वौ विज्ञात
व्यौ ययोर्द्वयोः। अनश्यदेकमपराश्रितमेवावतिष्ठते। तेषावयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। तन्तुपटादयः।
अवयवावयविनः। आश्रयनाशजन्यघटादिनाशस्थले नाशसमये घटादेरनाश्रितत्वाभ्युपगमाद्विनाशक्षणपर्यंतमिति। तत्र। निरगुणतदाश्रययो
रात्मात्मत्वजात्योर्विशेषनित्यद्रव्ययोरव्याप्तेः। अयं समवायस्तन्तुपटः समवेत इत्यादिप्रत्यक्षसिद्ध इति नैयायिकाः। वैशेषिकास्तु समवायो न प्रत्यक्षः
यावदाश्रयप्रत्यक्षं विना संबंधप्रत्यक्षासंभवात्। संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात्। अन्यथा घटौ संयुक्तावितिवत् घटाकाशौ सं
युक्तावितिः घटे रूपसमवाय इतिवदाकाशे शब्दसमवाय इत्यपि प्रत्यक्षापत्तेः। एतेन संयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षं हेतुर्लाघवात्। ननु सं
बंधप्रत्यक्षमात्रे। संयोगसमवायान्यतरत्वरूपसंबंधत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवादिति निरस्तं। उक्तप्रत्यक्षापत्तेर्वारणाय तस्या
वश्यकत्वात्। किंतु रूपादिघटादिसंबंधवत्तदाश्रितत्वादिसाध्यानुमानात्सिद्धिः। न चाधाराधेयभावादिरेव रूपघटयोः संबंधोस्त्विति।
शंक्यं। घटनाशाद् घटवृत्तिरूपरसादिनाशवत्तद्वृत्तिपटादेरभावस्य च नाशप्रसंगात्। घटध्वंसकालिकघटवृत्तिनाशत्वस्य घटनाशका
र्यतावच्छेदकत्वपर्यवसानात्। समवायाभ्युपगमे च पटसमवेतनाशत्वमेवावच्छेदकमतो न दोषः। न च तथापि घटनाशात् घटत्वनाशा
पत्तिः भावनाशं प्रति जन्यत्वेन कारणत्वात्। एतेन संबंधतया समवायकल्पने भूतलघटाभावाहरपि वैशिष्ट्याख्यसंबंधस्वीकारापत्ति
रित्यपास्तं। तत्र तत्कार्याभावादिति। रूपवान्घट इत्यादिविशिष्टप्रत्यक्षं तु संबंधाविषयत्वेपि तन्नियम्यत्वमात्रेण संगच्छते। अहं शरीरीत्यदृ
ष्टसंसर्गकप्रत्ययवदित्याहुः। मीमांसका [illegible] श्चवजः पृथक् पृथग्मद्गद्द इत्यपरे तु भवा[illegible]

समवायो निष्प्रमाणक इत्याहुः। ननु शक्तिसादृश्यादयोऽपि पदार्थान्तराणि सन्तीति कथं षडेव भावा इति चेन्न। अभिधारूपा वाच्यत्वज्ञक शक्तिस्तावद्
श्वरेच्छारूपेत्युक्तं। वह्न्यौ सहानुकूला शक्तिस्तत्कारणतारूपं सामान्यमेव। न च मण्यादिप्रतिबन्धकसत्वे दाहापत्तिवारणाय प्रतिबन्धकाऽपनो
द्यशक्तिस्वीकार इत्यावश्यक इति वाच्यं। मण्यभावादेरपि कारणत्वकल्पनया तन्निरासात्। ननु तत्वे दृष्टिविषयस्यानेन तत्वदनन्निबन्धरू
पस्याभावस्य चक्षुः सत्वे गत्वस्य पूर्वमीमांसायां कलधिकरणायुत्पादितत्वात् सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्स्वरूपं सामान्यमेवेति दि
॥१४॥ क्॥ ॥अभावो द्विधा। संसर्गाभावोऽन्योन्याभावश्च। संसर्गारोपजन्यप्रतीतिविषयोऽभावः आद्यः। भूतले घटो नेत्यारोप्येव निषेधप्रतीतेः। स त्रिधा।
प्रागभावो ध्वंसोऽत्यन्ताभावश्च। भविष्यतीति प्रतीतिविषयो विनाश्यभावः प्रागभावः। तस्य ध्वंसः प्रतियोगी तेन सह च उभयकाले घटप्रागभा
15 वान्नष्ट इति प्रतीतेः। उत्पत्तिमानभावो ध्वंसः। घटध्वंसो जात इति प्रतीतेः। तत्प्रागभावश्च घटस्तत्प्रागभावश्च उभयत्रापि ध्वंसो न भविष्य
तीति प्रतीतेः। स च न विनाशी। ध्वंसो नष्ट इति प्रतीत्यभावात्। व्यर्थध्वंसधाराकल्पनायां प्रमाणाभावाच्च। उत्पत्तिविनाशशून्यः संसर्गा
भावोऽत्यन्ताभावः। इदं वह्निर्नास्तीति भूतलादौ घटापसरणोत्तरं तदानयनात्पूर्वं च प्रतीतस्य घटकाले सत्वेऽपि न प्रतीतिः घटज्ञा
नेन प्रतिबन्धात्। प्रतियोगिदेशान्यदेशत्वस्यानतिप्रसंजकसंबन्धत्वाद्वेत्याचार्याः। उत्पत्तिविनाशशीलः प्रतियोगिसमानाधिकरण
स्तृतीय एव तत्र संसर्गाभाव इत्यन्ये। स द्विधा। एकमात्रपर्याप्तधर्मावच्छिन्नप्रतियोगिताकः अनेकपर्याप्तधर्मावच्छिन्नप्रतियोगि
ताकश्च। घटत्वादिप्रत्येकपर्याप्तं। एकस्मिन्नपि घट इति प्रतीतेः। तदवच्छिन्न आद्यः। द्वित्वाद्यनेकपर्याप्तं। घये द्वाविति वदेकोऽपि
वियत्प्रतीतेः। तदवच्छिन्नः एकघटवति घटौ न स्त इति प्रतीतिविषयोऽन्त्यः। न च प्रतियोगिमति कथमभाव इति वाच्यं। पुरुषमात्रव
ति दण्डीपुरुषो नास्तीति प्रतीतेर्दण्डविशिष्टपुरुषाभावस्वीकारे प्रतियोगितावच्छेदकविशिष्टस्यैवाभावविरोधित्वात्। न चैवं प्र
तीतिर्दण्डाभावं पुरुषाभावं संयोगाभावं वावगाहते। केवलदण्डपुरुषवति तत्संयोगवति पुरुषे दण्डे च दण्डीपुरुषो नास्तीत्यननुगत
प्रतीतेरिति दिक्। तादात्म्यारोपजन्यप्रतीतिविषयाभावो भेदः। घटः पटो नेत्यारोप्येव तन्निषेधात्। सोऽपि घटः पटो न घटो न पटः
पटाविति प्रतीतेः पूर्ववद्द्विधा। न च घटवति घटाभावो नास्ति घटो न घटभिन्न इति प्रतीतेरभावाभावोऽपि सिद्धात्। एवं सो १५

तिरस्वीकारात्। ततोऽतिरेके प्रमाणाभावादि १२

पि नास्तीति प्रतीत्या तदभावोपीत्यनवस्थेति शंक्यं। अत्यंताभावाभावः प्रतियोग्येव घटादिः। अन्योन्याभावाभावः प्रतियोगितावच्छेद-
कघटत्वादिरूप इति प्राचः। नव्यास्तु भावत्वेन प्रतीतेर्घटादिप्रतियोगितदवच्छेदकयोः समानवृत्तिकातिरिक्त एवात्यंताभावभेदयोरभावः
तदभावस्तु घटाभाव एवेति नानवस्था। एवं ध्वंसस्य प्रागभावः प्रागभावस्य ध्वंसश्चातिरिक्त एवेत्याहुः। नन्वधिकरणमेवाभावोस्तु। कु-
ना४ तोतिरिक्तस्वीकारः कुतो वा तद्गृह लाघवविशेषणस्वीकारः भूतले घटो नास्तीत्याधाराधेयभावस्यानेदपि घटाभावे घटो नास्तीति व्युत्पत्तेः।
अत्यंताभावे नित्यत्वादिना घटादिभूतलन्य भूतले घटानयनोत्तरं तत्संबंधाभावमात्रस्वीकारवदस्माभिस्तदा तदधिकरणघटाभावत्वसंबंधो नास्ती-
त्यभ्युपेयं। अतस्तदधिकरणं घटाभावो न वा। आद्ये घटकालेपि घटो नास्तीत्यापत्तिः। अन्त्ये घटनयनात्प्राक् नास्तीत्यनापत्तिरिति परास्तं। तस्मादतिरि-
क्ताभावे प्रमाणं इति चेत्। उच्यते। तत्त्वज्ञानिना क्रियमाणकर्मभिर्धर्माधर्मौ नोत्पद्येते इति सर्वसिद्धं तत्र कस्य हेतोः। मिथ्याज्ञानवासनारूपकारणा-
भावादिति चेन्न। अनंतमिथ्याज्ञानवासनानां हेतुतामपेक्ष्य प्राथमिकतत्त्वज्ञानव्यक्तिप्रागभावस्यैव हेतुत्वकल्पने लाघवात्। तथा च लाघवात्कार-
णत्वेन प्रागभावसिद्धिः। किंच अन्यतरकर्मजसंयोगे कर्मणः संयोगं प्रति न समवायेन हेतुता कर्मशून्ये तद्गृहे तत्र व्यभिचारात्। नापि कालिकसंबं-
धेन। घटकर्मणा तत्त्वाकाशसंयोगापत्तेः। तस्मात्स्वजन्यसंयोगप्रागभाववत्तासंसर्गेण कर्मणः कारणतावाच्येति प्रागभावसिद्धिः। एवमनेक-
तंतुकपटादिस्थले तत्तत्तंतुसंयोगानामपि न समवायेन हेतुता। संयोगेभ्यो द्विमात्रनिष्ठेभ्यः पटस्याधिकेषूत्पत्तेर्व्यभिचारात्। कालिकेन हे-
तुत्वे तत्रातिप्रसंगइत्युक्तरीत्या स्वजन्यपटप्रागभाववत्तासंसर्गेण हेतुतावाच्येति तत्सिद्धिः। एवं दाहे मण्यभावः प्रतिबंधकाभावतया
कारणं। तस्याधिकरणस्वरूपत्वे तावदधिकरणानां कारणत्वे गौरवात्। अभावव्यतिरेकेण कारणतावच्छेदकस्याधिकरणेद्रव्यत्वे च
त्वेन तद्योगाच्चात्यंताभावोपि लाघवादिभिर्भिन्न आवश्यकः। एवमतिरिक्तध्वंसमंतरेण मोक्षस्यैव दुर्वचत्वात् ध्वंसोप्यावश्यकस्तथा
हि। न तावन्नित्यसुखाभिव्यक्तिर्मुक्तिः। सुखवदभिव्यक्तेर्नित्यत्वे इदानीमपि सत्त्वेन मुक्तिसंसारयोरविशेषप्रसंगात्। न च नित्यसुखा-

भिव्यक्तिर्मुक्तिसमये जायते मनसेति मतं साध्य। जन्यभावस्य विनाशित्वनियमेनैकज्ञानव्यक्तेर्नाशे मुक्तिहानापत्तेः। अभिव्यक्तिपरंपरा च जन्यज्ञानाव
च्छिन्ने शरीरस्य हेतुत्वेन तदभावान्न युक्ता। तस्मादात्यन्तिको दुःखध्वंसो मुक्तिः। आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखतत्प्रागभावासमानकालिकत्वं तद
नीयदुःखध्वंसस्यास्मदीयदुःखप्रागभावसमानकालिकत्वात्तत्त्वापत्तेः इदानीमस्मदीयदुःखध्वंसस्य सुषुप्तिकाले दुःखासमानकालिकत्वसत्त्वात्प्रागभावेति।
उपात्तदुःखध्वंसस्य तत्प्रागभावासमानकालिकत्वादव्याप्तेरिति तादृशश्च मोक्षस्तत्त्वज्ञानेनात्मनि जन्यते। तद्यथा। तत्त्वज्ञानान्मिथ्याज्ञानवासनानिवृत्तौ रागद्वेष
॥१५८॥ मोहानां निवृत्त्या धर्माधर्मयोरप्रवृत्तिरेव न। पूर्वसंस्कारोत्पन्नप्रवृत्त्या धर्माधर्मस्य तावदपि नादृष्टोत्पत्तिः अदृष्टहेतुमिथ्याज्ञानस्य तत्त्वज्ञानप्रागभावस्य वाऽभावात्।। तथा चो
क्तं वाचस्पतिमिश्रैः। मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ धर्माधर्मबीजांकुरं जनयतः इत्यादिना। प्राचीनादृष्टं च ज्ञानाग्निसहकृतयोगजधर्माकायव्यूहेन।
15 युगपत्सर्वभोगान्नश्यति। तथा च पूर्वकर्मसमाप्तौ भोक्तृत्वकर्मान्तराभावाज्जन्माभावसिद्धे वर्त्तमानशरीरभोग्यसर्वदुःखनाशसिद्धे वात्यंतिकदुःख
निवृत्तिरिति। तथा चाक्षपादीयं सूत्रं। दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति।। ॥ननु किं तत्त्वज्ञा
नं। किं वा मिथ्याज्ञानं कथं वा तयोर्निवर्त्यनिवर्त्तकभावः। उच्यते। देहेन्द्रियादावनात्मन्यात्मत्वबुद्धिरेव मिथ्याज्ञानं। तत्तु संसारिणामनादिप्रवाहागतं। दुर्बुद्धि
कल्पितकुतर्कदृढतरं जायते। यथा लोकायतिकानां तद्युक्त्या देहात्मवादे। नित्यात्मवादसाधकयुक्तिभिर्नित्यत्वानुमानेऽपि चात्मपक्षे इन्द्रियोपघातेऽपि बुद्धिसत्त्व
मात्रेरणसुखाद्युपलब्धेः बुध्यात्मवादे। तदभावेऽपि सुषुप्तौ सामकर्त्तव्यवहारात्प्राणात्मवादे तत्तश्च तन्निरासार्थं देवानां तेषामात्मत्वे युगपदेवकस
विदिष्टार्थपरस्परविरोधात् नानाशायचक्रक्रियोपपत्त्याऽप्रवृत्तिनिवृत्त्योः संकरापत्तिरित्यादिका देहाद्यतिरिक्तव्यापकात्मनिर्णायकतर्करूपा न्याय प्रमाणा
नामसत्त्वनिर्णायकः श्रुतिस्मृतीतिहासानां तादृगात्मप्रतिपादकानां तादृगात्मप्रतिपादने तात्पर्यनिर्णायकश्च न्यायसमूहोऽनुसंधेयः। तदनुसंधानमे
व च विचारः। स द्विधा। श्रवणमननभेदात्। तत्र न्यायोपेतलीनतात्पर्यकश्रुत्यादिभिरात्मनिर्णयः श्रवणं। ततो युक्त्यादि कुतर्कजालैरसंभावनावि
परीतभावनोत्पत्तेस्तन्निवारकन्यायानुसंधानं मननं। ततश्च व्यासंगत्यागेन देहाद्यतिरिक्तात्माकारमनोनुसंधानं निदिध्यासनं। ततो यथा दे
हाद्यतिरिक्तात्मसाक्षात्कारस्तत्त्वज्ञानात्मको जायते। यः समूलं मिथ्याज्ञानमुन्मूलयति। विशाबदर्शनजन्यलौकिकसाक्षात्कारत्वेनमनिव
र्त्तकत्वदर्शनात्। श्रुतिरप्येवमाह। तरति शोकमात्मवित्। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति। मिथ्याज्ञाननाशः शोककारणं।

सर्वेकं शरीरव्यापिदुःखाद्युपलब्धिहेतुत्वेन सर्वेन्द्रियव्यापकत्वमादौ दृष्टवसमुदायात्मपक्षे ८

तद्धेतुरात्मदर्शनं। तद्धेतूनि श्रवणादीनि त्रीणीत्यादिविवेकः। न चात्मतत्त्वसाक्षात्कारस्यैव मिथ्याज्ञाननाशकत्वे द्रव्यादिसर्वपदार्थप्रतिपादनं व्यर्थमिति वे
न्न· तत्त्वज्ञानमंतरेण तज्जिज्ञासेनात्मज्ञानासंभवात् परंपरयोपयोगेन सार्थक्यात्· न्यायव्युत्पादकत्वेनाप्युपयोगाच्च· तथात्मज्ञानं भगवत्प्रसादमंतरे
ण न भवतीति सोपि तत्त्वतो ज्ञेय उपास्यश्च· तथा च श्रुतिः। यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः। तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीति। आचार्यै
रप्युक्तं· स हि तत्त्वतो ज्ञातः आत्मसाक्षात्कारस्योपकरोतीति। ननु ईश्वरे किं मानं· न प्रत्यक्षं तस्य परोक्षत्वात्· नापि क्षितिः सकर्तृका कार्यत्वात् घटवदित्यनु
मानं मानं· परमाणुवंशतो बोधात्· घटादावंशतः सिद्धसाधनाच्च· अदृष्टद्वारा जीवकर्तृकत्वेन सिद्धसाधनाच्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृ
तिमत्त्वरूपकर्तृत्वेन कुलालादेर्हेतुतायां असिद्धेश्च अनेकज्ञानादौ कारणतावच्छेदककल्पने गौरवापत्तेः। कृतिमत्त्वस्यैव कर्तृपदार्थत्वाच्च कृधा
त्युत्तरतृचस्तदर्थाश्रयवाचकत्वात्। अस्तु तर्हि कृतिमत्त्वेनैव हेतुतेति चेन्न· अनेककृतिषु कारणतावच्छेदकत्वे गौरवात्तेन रूपेणापि हेतुत्वासिद्धेः।
किंचैवमीश्वरे ज्ञानेच्छयोरसिद्ध्यापत्तिः। श्रुतेस्तु सिद्धिरिति चेत्· न· सुखस्यापि स्वीकारापत्तेः। आनंदं ब्रह्मणो विद्वानिति श्रुतेः। न च वेदकर्तृ
त्वेनेश्वरसिद्धिः। तस्यानादित्वात्· शिवाद्यास्तु विपर्यस्ताः स्मर्तारोस्य न कारका इति स्मृतेरिति चेत्· अत्रोच्यते· कुलालादिचेतनासंवलितम
दादिभिर्घटाद्युजननात्तत्र कुलालादेर्हेतुतेति सर्वसिद्धं· तत्र कारणतावच्छेदकं न कुलालत्वादिजातिः। कुलालब्राह्मणादिभिरपि तज्जन
नात् तत्र सांकर्यसंकरापत्तेः। नोपाधिर निर्वचनात्· घटजनकत्वस्य चक्रादिसाधारणत्वात्· घटजनकत्वेन घटहेतुतायां असंभवाच्च। कृ
तिमत्त्वेन हेतुतायाश्चात्वयैव निरासात्· तस्मादात्मत्वमेव कारणतावच्छेदकं· परं तु अनेनेदमेतत्स्वर्थमिहं करिष्यामीत्याद्यालोचनरूपज्ञा
नतादृशेच्छाप्रयत्नास्ते आपाताः अन्वयव्यतिरेकसिद्धाः। तान्विना कुलालादेर्घटाद्यनुत्पत्तेः। अतो द्व्यणुकाद्युपादानगोचरपरमाणुभिर्द्व्यणु
कं करिष्यामि आकाशेन शब्दं करिष्यामीत्यादिकज्ञानादिमानात्मा तत्कर्तृत्वाच्चः स च सृष्ट्यादौ शरीराद्यभावात्तादृशजन्यज्ञानासंभवान्नित्यज्ञान
वान्सिध्यन्नीश्वर इत्युच्यते· एवं च कार्यमात्रकारणतावच्छेदकत्वेनैव जीवेश्वरसाधारणात्मत्वजातिसिद्धिरिति विभावयामः॥ न॰

ता॰ दी॰

१६ धाचजन्यह्रू जन्यं कार्यं आत्मजन्यं कार्यत्वात् घटवदित्यनुमानमेवतत्र प्रमाणं घटादवंशतः सिद्धसाधनवारणाय जन्यांतं पक्षे विशेषणं पक्षता
वच्छेदकावच्छेदेन साध्यासिद्ध्युद्देश्यत्वमस्यादूषणत्वेवतन्नोपादेयमेव एवंचेश्वरस्य सर्वज्ञतापि सिध्यति केषांचित्पदार्थानां प्रत्यक्षेण केषांचि
त्स्वाश्रयत्वेन केषांचिद्विषयत्वेन केषांचिदवच्छेदकत्वेन विषयीकरणादिति निरूपितमस्माभिस्तर्करत्ने एवं वेदकर्तृत्वेनापि तत्सिद्धिः अतस्माद्यज्ञा
त्सर्वहुत ऋचः सामानि जज्ञिरे इति श्रुतेः वेदः सकर्तृकः वाक्यत्वात् भारतादिवदित्यनुमानाच्च वेदस्य सकर्तृकत्वावगमात् स्मर्ता इति
स्मृतिः स दशापरा स्मृतिर्यथा स्वसमानविषयावाक्यापेक्षा तथा वेदः कल्पांतरीयानुपूर्वीवानित्यस्यान्यत्र निर्णीतत्वादि सर्वं विस्तरः तस्य
चेश्वरस्योपासनाश्रुतिस्मृत्याद्यनुसारेणानेकधा महत्त्वावगंतव्येति पल्लवेनालं॥ ॥बालबुद्धिप्रकाशार्थं पदार्थानां प्रदीपिका रंगो
जिभट्टपुत्रेण कोंडभट्टेन निर्मिता॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण रंगोजिभट्टात्मजकोंडभट्टकृता पदार्थदीपिका
संपूर्णा॥ ॥ ॥श्रीलक्ष्मीनारायणाय नमः॥ यत्नादालय संस्कृ टपरि चयो त्सादनाय्याइदेहं गौरि
हरि रपि यदीया इदेहं जहार। चत्यु द्दोमाय परिमित गुण ग्रामगाशं तमादी वंदे यस्मादमलमति जि
तेमो क्षेल क्ष्मीः॥१॥ रघुवीरकृतं दुव्यंसारसंग्रहं लोकनैः॥ संतः श्रवरं तु निशं कं सिद्धांतसिद्धवर्त्मे
त्रसकैशिष्टैर्ग्रंथादौ मंगलस्यापनिवद्धत्वादादौ मंगलफलं विचार्यते॥ तत्र केचिन्मंगलं समाप्तिफलं
स्यान्यापफलकत्वे सति सफलत्वादित्यनुमानान्मंगले समाप्तिफलकत्वसिद्धिरिति समाप्तिरेव मंगला
नेचौपदर्शितानुमानेहेतुविशेषणासिद्धा न किंचिदेवादितिवाच्यं मंगलं समाप्त्यन्यापफलकं समाप्ति हरम
याशिष्टैः कर्तव्यत्वादित्यनुमानान्मंगलस्य समाप्त्यन्यापफलकत्वसिद्धेरुपदर्शितहेतुविशेषणासिद्ध्यभावात् १६

लप